

नाटकम्

# ६. यागाश्वबन्धनम्

**आमुखम्**

प्रसिद्धेषु संस्कृतनाटककर्तृष्वन्यतमेन भवभूतिना विरचितम् उत्तररामचरितं सर्वोत्तमा नाटकरचनाऽस्ति। नाटकस्यास्य गुणसम्पदः पर्यालोचनायां भवभूतिः कालिदासादनन्तरं कवीनामग्रे गणनामर्हति। 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' इति प्रथा युक्तैव। रामायणस्य उत्तरकाण्डगतम् इतिवृत्तं स्वीकृत्य सप्तभिः अङ्कैः विरचितमिदं नाटकं करुणरसप्रधानम्। नाटकस्यास्य चतुर्थाङ्कस्य अन्तिमो भागोऽत्र स्वीकृतः।

अयोध्याधिपो राजा श्रीरामः अश्वमेधयागं करोति। यागाङ्गतया सेनानुगतः कश्चनाश्वः देशे सर्वत्र पर्यटनमकरोत्। यागाश्वसंरक्षणाय लक्ष्मणसुतश्चन्द्रकेतुर्नियुक्तः। वाल्मीकेराश्रमसमीपमागतं तमश्वं दृष्ट्वा विस्मिताः वटवः लवसमीपमागच्छन्ति। प्राचेतसं द्रष्टुं जनकः, कौसल्या, अरुन्धती च तत्र सन्निहिताः आसन्। अयमेवात्र सन्दर्भः।

वटवः - (*ससंभ्रमं*) कुमार! कुमार!! अश्वोऽश्व इति कोऽपि भूतविशेषो जनपदेष्वनुश्रूयते, सोऽयमधुनाऽस्माभिः स्वयं प्रत्यक्षीकृतः।

लवः - अश्वोऽश्व इति नाम पशुसमाम्नाये सांग्रामिके च पठ्यते, तत् ब्रूत - कीदृशः?

वटवः - अये श्रूयताम् -

**पश्चात्पुच्छं वहति विपुलं, तच्च धूनोत्यजस्रं**
**दीर्घग्रीवः स भवति, खुरास्तस्य चत्वार एव।**
**शष्पाण्यत्ति, प्रकिरति शकृत्पिण्डकानाम्रमात्रान्**
**किं व्याख्यानैर्व्रजति स पुनर्दूरमेह्येहि यामः।।**

(*इत्यजिने हस्तयोश्चाकर्षन्ति*)



लवः - (*सकौतुकोपरोधविनयम्*) आर्याः पश्यत। एभिर्नीतोऽस्मि। (*इति त्वरितं परिक्रामति।*)

अरुन्धतीजनकौ - महत्कौतुकं वत्सस्य।

कौसल्या - अरण्यगर्भरूपालापैर्यूयं तोषिता वयं च। भगवति! जानामि! तं पश्यन्ती वञ्चितेव। तस्मादितोऽन्यतो भूत्वा प्रेक्षामहे तावत्पलायमानं दीर्घायुषम्।

अरुन्धती - अतिजवेन दूरमतिक्रान्तः स चपलः कथं दृश्यते?

कञ्चुकी - (*प्रविश्य*) भगवान् वाल्मीकिराह - 'ज्ञातव्यमेतदवसरे भवद्भिरि'ति।

जनकः - अतिगम्भीरमेतत् किमपि। भगवत्यरुन्धति, सखि कौसल्ये, आर्य गृष्टे, स्वयमेव गत्वा भगवन्तं प्राचेतसं पश्यामः।

(*इति निष्क्रान्तो वृद्धवर्गः*)

वटवः - (*प्रविश्य*) पश्यतु कुमारस्तावदाश्चर्यम्।

लवः - दृष्टमवगतं च। नूनमाश्वमेधिकोऽयमश्वः।

वटवः - कथं ज्ञायते?

लवः - ननु मूर्खाः! पठितमेव हि युष्माभिरपि तत्काण्डम्। किं न पश्यथ? प्रत्येकं शतसंख्याः कवचिनो दण्डिनो निषङ्गिणश्च रक्षितारः। तत्प्रायमेवान्यदपि दृश्यते। यदि च विप्रत्ययस्तत्पृच्छथ।

वटवः - भो भोः! किंप्रयोजनोऽयमश्वः परिवृतः पर्यटति?

लवः - (*सस्पृहमात्मगतम्*) अये अश्वमेध इति नाम विश्वविजयिनां क्षत्रियाणामूर्जस्वलः सर्वक्षत्रपरिभावी महानुत्कर्षनिकषः।

(*नेपथ्ये*)

**योऽयमश्वः पताकेयमथवा वीरघोषणा।**
**सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः॥**

लवः - (*सगर्वमिव*) अहो संदीपनान्यक्षराणि।

वटवः - किमुच्यते? प्राज्ञः खलु कुमारः।





लवः - भो भोः, तत्किमक्षत्रिया पृथिवी, यदेवमुद्घोष्यते?

(*नेपथ्ये*)

अरे रे, महाराजं प्रति कुतः क्षत्रियाः?

लवः - धिग्जाल्मान्।

**यदि ते सन्ति सन्त्येव केयमद्य विभीषिका।**
**किमुक्तैरेभिरधुना तां पताकां हरामि वः।।**

भो भो वटवः, परिवृत्य लोष्ठैरभिघ्नन्तो नयतैनमश्वम्। एष रोहितानां मध्ये वराकश्चरतु।

(*प्रविश्य सक्रोधदर्पः*)

पुरुषः - धिक्चापलम्, किमुक्तवानसि? तीक्ष्णनीरसा ह्यायुधीयश्रेणयः शिशोरपि दृप्तां वाचं न सहन्ते। राजपुत्रश्चन्द्रकेतुररिमर्दनः। सोऽप्यपूर्वारण्यदर्शनाक्षिप्तहृदयो न यावदायाति तावत्त्वरितमनेन तरुगहनेनापसर्पत।



वटवः - कुमार, कृतमनेनाश्वेन। तर्जयन्ति विस्फुरितशस्त्राः कुमारमायुधीयश्रेणयः। दूरे चाश्रमपदमितस्तदेहि हरिणप्लुतैः पलायामहे।

लवः - (*विहस्य*) किं नाम विस्फुरन्ति शस्त्राणि? (*इति धनुरारोपयन्*)

**ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्र-**
**मुद्गारिघोरघनघर्घरघोषमेतत्।**
**ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्र-**
**जृम्भाविडम्बिविकटोदरमस्तु चापम्॥**

(*इति यथोचितं परिक्रम्य निष्क्रान्ताः सर्वे।*)

**पदच्छेदः**

| | | |
|---|---|---|
| जनपदेष्वनुश्रूयते | - | जनपदेषु + अनुश्रूयते। |
| अश्वोऽश्व इति | - | अश्वः + अश्वः + इति। |
| धूनोत्यजस्रम् | - | धूनोति + अजस्रम्। |
| खुरास्तस्य | - | खुराः + तस्य। |
| एह्येहि | - | एहि + एहि। |
| एभिर्नीतोऽस्मि | - | एभिः + नीतः + अस्मि। |
| आलापैर्यूयम् | - | आलापैः + यूयम्। |
| वञ्चितेव | - | वञ्चिता + इव। |
| भवद्भिरिति | - | भवद्भिः + इति। |
| निषङ्गिणश्च | - | निषङ्गिणः + च। |
| योऽयमश्वः | - | यः + अयम् + अश्वः। |
| पताकेयम् | - | पताका + इयम्। |
| सन्त्येव | - | सन्ति + एव। |
| केयम् | - | का + इयम्। |



| | | |
|---|---|---|
| वराकश्चरतु | - | वराकः + चरतु। |
| धनुरारोपयन् | - | धनुः + आरोपयन्। |
| शिशोरपि | - | शिशोः + अपि। |
| चाश्रमपदम् | - | च + आश्रमपदम्। |
| इतस्तदेहि | - | इतः + तद् + एहि। |

**विग्रहः**

| | | |
|---|---|---|
| जनपदेषु | - | जनैः पद्यन्ते इति जनपदाः, तेषु। |
| प्रत्यक्षीकृतः | - | अप्रत्यक्षः प्रत्यक्षः सम्पद्यमानः कृतः। |
| सकौतुकोपरोधविनयम् | - | कौतुकेन उपरोधेन विनयेन च सह वर्तत इति यस्मिन् कर्मणि तद्यथा तथा। |
| अरण्यगर्भरूपालापैः | - | अरण्ये गर्भः येषां ते अरण्यगर्भाः, तेषां इव रूपैः आलापैः च। |
| सांग्रामिके | - | संग्रामे भवः सांग्रामिकः, तस्मिन्। |
| शतसंख्याः | - | शतं संख्या येषां ते। |
| दीर्घग्रीवः | - | दीर्घा ग्रीवा यस्य सः। |
| आम्रमात्रान् | - | आम्रं प्रमाणम् एषाम् अस्ति इति आम्रमात्राः, तान्। |
| अतिजवेन | - | अतिशयितेन जवेन। |
| अतिगम्भीरम् | - | अतिशयितं गम्भीरम्। |
| अक्षत्रिया | - | न विद्यन्ते क्षत्रियाः यस्यां सा। |
| उत्कर्षनिकषः | - | उत्कर्षस्य निकषः। |
| किंप्रयोजनः | - | किं प्रयोजनं यस्य सः। |
| आयुधीयश्रेणयः | - | आयुधेन जीवन्ति इति, तेषां श्रेणयः। |
| अपूर्वारण्यदर्शनाक्षिप्तहृदयः | - | अपूर्वस्य अरण्यस्य दर्शनेन आक्षिप्तं हृदयं यस्य सः। |
| सगर्वम् | - | गर्वेण सह वर्तते इति यस्मिन् कर्मणि तद्यथा तथा। |
| विस्फुरितशस्त्राः | - | विस्फुरितानि शस्त्राणि येषां ते। |



उद्गारिघोरघनघर्घरघोषम् - घर्घरश्चासौ घोषश्च घर्घरघोषः, घनस्य इव घर्घरघोषः घनघर्घरघोषः, घोरः घनघर्घरघोषः यस्य सः, उद्गारी चासौ घोरघनघर्घरघोषः तम्।

हरिणप्लुतैः - हरिणानाम् इव प्लुतैः।

**व्याकरणविशेषः**

महाराजं प्रति - प्रति शब्दयोगे द्वितीया।

धिग् जाल्मान् - धिगिति योगे द्वितीया।

कृतमश्वेन - कृतम् इति अलमित्यर्थे अव्ययम्। अतः तृतीया। अश्वेन किमपि साध्यम् नास्ति इत्यर्थः।

**पठनप्रवर्तनानि**



❖ कथापात्राणां भागं स्वीकृत्य नाटकं कक्ष्यायामवतारयतु।

**श्रद्धेयाः अंशाः**

- सङ्घे चर्चा।
- आसूत्रणम्।
- अवतारणम्।



❖ नाटकस्थानि पद्यानि सतालमालपतु।

**श्रद्धेयाः अंशाः**

- चर्चा।
- आसूत्रणम्।
- अवतारणम्।



❖ लवस्य स्वभावविशेषान् अधिकृत्य चर्चित्वा खण्डिकां लिखतु, कक्ष्यायामवतारयतु।

**श्रद्धेयाः अंशाः**

- चर्चा।
- खण्डिकालेखनम्।
- कक्ष्यायामवतारणम्।



## व्याख्यानम्

**पश्चात्पुच्छं................**

**अन्वयः** - (अश्वः) पश्चात् विपुलं पुच्छं वहति, तच्च अजस्रं धूनोति, स दीर्घग्रीवो भवति, तस्य चत्वार एव खुराः, शष्पाणि अत्ति, आम्रमात्रान् शकृत्पिण्डान् प्रकिरति। व्याख्यानैः किम्? स पुनः दूरं व्रजति, एहि एहि यामः।

**व्याख्या** - सः अश्वः पश्चात् - पृष्ठभागे, विपुलं - विशालं, पुच्छं - लाङ्गूलं, वहति - धरति। तत् च - तत् पुच्छं च, अजस्रं - निरन्तरं, धूनोति - चालयति। सः - अश्वः, दीर्घग्रीवः - आयतकन्धरः भवति, तस्य अश्वस्य, चत्वार एव - चतुःसंख्याका एव, खुराः - शफाः, सः - अश्वः, शष्पाणि - बालतृणानि, अत्ति - खादति। आम्रमात्रान् - आम्रफलप्रमाणान्, शकृत्पिण्डकान् - पुरीषपिण्डकान्, प्रकिरति - विक्षिपति। व्याख्यानैः - विवरणैः, किं - किं प्रयोजनम्? सः - अश्वः, दूरं - विप्रकृष्टं, व्रजति - गच्छति। एहि एहि - आगच्छ आगच्छ, यामः - तत्समीपं गच्छामः।

**सारः** - सः मृगः रोमभिः निबिडं पुच्छं पश्चाद्भागे वहति। सः तत् पुच्छं सर्वदा कम्पयति। सः दीर्घग्रीवः भवति। तस्य चत्वारः एव खुराः सन्ति। सः बालतृणानि भक्षयति। सः चूतफलप्रमाणान् शकृत्पिण्डान् विसृजति। तस्य गुणानां विशिष्य वर्णनैः किं प्रयोजनम्? सः पुनः दूरं गच्छति। हे सखे! शीघ्रम् आगच्छ। गच्छन्तं तं वयम् अनुगच्छामः।

**अलङ्कारः** - स्वभावोक्तिः। **वृत्तं** - शार्दूलविक्रीडितम्।

**योऽयमश्वः............**

**अन्वयः** - यः अश्वः सोऽयं, इयं सप्तलोकैकवीरस्य दशकण्ठकुलद्विषः पताका अथवा वीरघोषणा भवति।

**व्याख्या** - यः अश्वः - तुरङ्गमः, सोऽयं - समीपस्थः, इयम् - एषा, सप्तलोकैकवीरस्य - सप्तसु लोकेषु सप्तभुवनेषु, एकवीरस्य - अद्वितीयपराक्रमशालिनः, दशकण्ठकुलद्विषः - रावणकुलशत्रोः, पताका - कीर्तिध्वजः, अथवा - आहोस्वित्, वीरघोषणा - वीरत्वसूचकः पटहध्वनिः भवति।

**सारः** - अयं पुरतो वर्तमानः अश्वः सप्तलोकैकवीरस्य रावणकुलशत्रोः रामस्य यशःपताका भवति। अथवा इयं पताका तस्य वीरत्वस्य सूचिका घोषणा भवति।



**यदि ते सन्ति........**

**अन्वयः** - यदि ते सन्ति, सन्ति एव। अद्य इयं का विभीषिका? अधुना एभिः उक्तैः किम्? वः तां पताकां हरामि।

**व्याख्या** - यदि ते - क्षत्रियाः, सन्ति - सर्वोत्कर्षेण वर्तन्ते, तर्हि सन्ति एव - वर्तन्त एव। अद्य - साम्प्रतम्, इयम् - एषा, का विभीषिका - किमर्थं भयोत्पादनम्? एभिः - एतैः, उक्तैः - कथनैः, किं किं प्रयोजनम्? वः - युष्माकं, तां - पूर्वोक्तां, पताकां - विजयध्वजरूपमश्वं, हरामि - बलात् नयामि।

**सारः** - क्षत्रियाः यदि सन्ति तर्हि ते भवन्तु। तेन मम किं प्रयोजनम्। महाराजं प्रति इत्यादिना विशिष्य भयोत्पादनं किमर्थम्? एभिः वाक्प्रपञ्चैः किं प्रयोजनम्? अद्यैव युष्माकं यशःपताकाभूतम् आश्वमेधिकाश्वं प्रसह्य स्ववशं नयामि।

**ज्याजिह्वया............**

**अन्वयः** - ज्याजिह्वया वलयितोत्कटकोटिदंष्ट्रम् उद्गारिघोरघनघर्घरघोषम् एतत् चापं ग्रासप्रसक्तहसदन्तकवक्त्रयन्त्रजृम्भाविडम्बिविकटोदरम् अस्तु।

**व्याख्या** - ज्याजिह्वया ज्या - मौर्वी, सैव जिह्वा - रसना तया, वलयितोत्कटकोटिदंष्ट्रं - वलयिते - वेष्टिते, उत्कटकोटी - उन्नताग्रभागौ एव दंष्ट्रे यस्य तत्, उद्गारिघोर-घनघर्घरघोषम् - उद्गारी - उद्यन्, घोरः - भीषणः, घनस्येव - मेघस्येव, घर्घरघोषः - घर्घरध्वनिः यस्य तथाविधम् एतत् - चापम्, इदं - धनुः, ग्रासप्रसक्तहसदन्त-कवक्त्रयन्त्रजृम्भाविडम्बिविकटोदरं, ग्रासे - कबलने, प्रसक्तः - व्यापृतः, अत एव हसत् - हासं कुर्वत्, अन्तकः - कृतान्तः, तस्य - वक्त्रयन्त्रस्य, वक्त्रं - मुखं यन्त्रमिव तस्य यन्त्रतुल्यमुखस्य, जृम्भाविडम्बि जृम्भां - व्यादानं, विडम्बयति - अनुकरोति तत् जृम्भासमानं, विकटोदरं विकटं - भीषणम्, उदरम् - अन्तरालं यस्य तत् अस्तु - भवतु।

**सारः** - मौर्वीरूपरसनया वेष्टितोन्नमितदंष्ट्रासदृशकोटियुक्तः (धनुषोऽग्रभागः कोटिः) घोरघनघर्घरघोषम् अन्तकस्य यन्त्रतुल्यस्य मुखस्य जृम्भणानुकारिनिम्नोन्न-तमध्यप्रदेशयुक्तं ममेदं धनुः युद्धाय सज्जं भवतु।



# अनुबन्धः

## धातुरूपाणि

**धूञ् कम्पने लट् परस्मैपदी**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | धूनोति | धूनुतः | धून्वन्ति |
| म. पु. | धूनोषि | धूनुथः | धूनुथ |
| उ. पु. | धूनोमि | धूनुवः, धून्वः | धूनुमः, धून्मः। |

**अद भक्षणे लट् परस्मैपदी**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्र. पु. | अत्ति | अत्तः | अदन्ति |
| म. पु. | अत्सि | अत्थः | अत्थ |
| उ. पु. | अद्मि | अद्वः | अद्मः। |

## टिप्पणिः

पशुसमाम्नायः - पशुनामसंग्रहशास्त्रं, पशुवर्गे पशुद्रव्यकयागप्रतिपादकवेदभागः इति यावत्।

तस्य चत्वार एव खुराः - गवाम् अष्टशफाः सन्ति। अश्वानां तु चत्वार एव इति अत्र एवकारस्य प्रयोजनम्।

कञ्चुकी - ये विद्यासत्यसम्पन्नाः कामदोषविवर्जिताः।
ज्ञानविज्ञानकुशलाः कञ्चुकीयास्तु ते स्मृताः।।

## अमरकोशः

प्राज्ञः - विद्वान् विपश्चिद्दोषज्ञः सन् सुधीः कोविदो बुधः।
धीरो मनीषी ज्ञः प्राज्ञः संख्यावान् पण्डितः कविः।।

जाल्मः - विवर्णः पामरो नीचः प्राकृतश्च पृथग्जनः।
निहीनोपसदो जाल्मः क्षुल्लकश्चेतरश्च सः।।
जाल्मोऽसमीक्ष्यकारी स्यात्।

ग्रीवा - कण्ठो गलोऽथ ग्रीवायां शिरोधिः कन्धरेत्यपि।

ज्या - मौर्वी ज्या शिञ्जिनी गुणः।



चापः - धनुश्चापौ धन्वशरासनकोदण्डकार्मुकम्। इष्वासः।

वक्त्रम् - वक्त्रास्ये वदनं तुण्डमाननं लपनं मुखम्।

अश्वः - घोटके वीतितुरगतुरङ्गाश्वतुरङ्गमाः।
वाजिवाहार्वगन्धर्वहयसैन्धवसप्तयः।

पताका - पताका वैजयन्ती स्यात् केतनं ध्वजमस्त्रियाम्।

## किं कृतम् ?

❖ **नाटकावतारणम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| आसूत्रणं कृतम्। | | | |
| अवतारणं कृतम्। | | | |

❖ **सतालमालपनम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| आसूत्रणं कृतम्। | | | |
| आलपनं कृतम्। | | | |

❖ **खण्डिकालेखनम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| खण्डिका लिखिता। | | | |
| अवतारणं कृतम्। | | | |



उपन्यासः

# ७. केरलीयकलारूपाणि

**आमुखम्**

कलारूपाणि तत्तद्देशीयाचारानुष्ठानसम्बन्धीनि भवन्ति। प्रादेशिकजनजीवनस्य तत्संस्कारस्य च दर्पणायन्ते एतानि। मानवसमाजस्य जीवनव्यवहारादाविर्भूताः सर्वाः कला इति नरवंशशास्त्रज्ञाः अभिप्रयन्ति। तादृशानि कानिचन केरलीयकलारूपाण्यस्मिन् पाठभागे प्रतिपाद्यन्ते।

## चाक्यार्कूत्त्



हैन्दवाराधनालयेषु प्रचलिता प्रसिद्धा केरलीयकला भवति कूत्त्। अस्याः अवतारकः भवति “चाक्यारः”। अतः चाक्यार्कूत्त् इति नाम्ना व्यवह्रियते। जर्जरिताचारानुष्ठानदूरीकरणद्वारा सामान्यजनेषु धार्मिकविचारोत्पादनम् आसीदस्य कलारूपस्य मुख्य-मुद्देश्यम्। चम्पूप्रबन्धेभ्यः श्लोकान् स्वीकृत्य साभिनयव्याख्यानरूपेण रङ्गावतारणमेव चाक्यार्कूत्। हास्यरसप्रधाने कलारूपेऽस्मिन् प्रकरणानुसारं प्रमत्ताधिकारिवर्गाः समाजगताः दुराचाराश्च तत्सन्निधावेव सोपहासं विमृश्यन्ते। चतुर्विधाभिनयप्रकाराः यथायथं सन्निवेशिताः भवन्ति। विधिमनुसृत्य निर्मिते नाट्यमण्डपे अन्यत्र उचिते स्थाने वा चाक्यार्कूत्त् प्रचाल्यते। देवप्रीत्यर्थम् अनुष्ठीयमानेयं कला अनुष्ठानकला इत्याख्यायते। अत्र मिषाव् नट्वाङ्गप्रभृतीनि वाद्योपकरणानि उपयुज्यन्ते। प्रज्वलितस्य दीपस्य पुरतः कलारूपमेतदवतार्यते। वाक्षु दृक्षु च युगपत् हास्यमाविष्कर्तुं प्रगल्भाः एते कलोपजीविनः तदनुसारिभिः वस्त्रसन्निवेशनैः मुखालङ्कारैश्च सामाजिकान् बहु आह्लादयन्ति।



## पाठकम्

हैन्दवाराधनालयेषु अनुष्ठीयमानः आख्यानात्मकः केरलीयकलाविशेषः भवति पाठकम्। अस्य अवतारकाः नम्ब्यार् समुदायगताः कलाकाराः आसन्। किन्तु इदानीं समुदायभेदं विना सर्वे कलामेनामवतारयन्ति। 'कूटियाट्टं', 'चाक्यार्कूत्त्' इत्येतयोः सम्पर्केण एषा कला विकासमुपगता इति श्रूयते।

कलायाः अस्याः साहित्यं पुराणकथाभ्यः स्वीकृतमेव। भक्तिभावस्य प्राधान्यमेव अनया प्रकाश्यते इति हेतोः अङ्गुलीनिर्देशपूर्वकं परिहासादिकमस्यां वर्जनीयम्। अतीव ललितं भवति पाठकस्य वेषविधानम्। भस्माङ्कितशरीरे रक्तवर्णाङ्कितं शिरस्त्रं, पट्टाम्बरं, रुद्राक्षमालां च धरति पाठकावतारकः। पुराणकथाज्ञानं, भाषापाण्डित्यं च अस्मिन्ननुपेक्षणीयम्। पुरतः प्रकाश्यमानस्य दीपस्य सन्निधौ इदमवतार्यते। वाद्यानि इतरसज्जीकरणानि च न सन्तीति विशेषः।

## हरिकथा

गद्यपद्यमयैर्वाक्यैः पुराणकथाकथनात्मकः कलाविशेषः हरिकथा। कालक्षेपः, हरिकथाकालक्षेपः, सत्कथाकालक्षेपश्च अस्यैव कलारूपस्य नामान्तराणि। क्रिस्तोः परम् एकोनविंशे शतके द्रविडदेशे लब्धप्रचारस्यास्य उद्देश्यन्तु भगवत्कथायाः श्रवणेन कीर्तनेन च कालक्षेपः करणीयः इति। केरलेष्वपि हरेः कथा इत्यर्थे प्रचारमाप्ता। अधुना विविधवाद्योपकरणानामनुगमनेन अवतार्यमाणं कथाकथनमस्याः परिष्कृतं रूपमेव।



वन्दनश्लोकः, निरूपणं, पञ्चपदी, अञ्जनगीतं, प्रथमपदम् इत्येभिः पञ्चभिरङ्गैः युक्तं भवति एतत्कलारूपम्। अस्यावतारणे कथाकारस्य प्रभाषणचातुरी, उच्चारणशुद्धिः, पुराणकथाज्ञानं, हास्यरसाविष्करणसामर्थ्यञ्च अवश्यमपेक्ष्यते। अङ्गवस्त्रं, वस्त्रमयं शिरस्त्रं, रुद्राक्षमाला, सिन्दूरतिलकं, कुण्डलञ्च धृत्वा वेदीं प्रविशति कलाकारः। एकोनविंशतितमशतकस्योत्तरार्धे तञ्चावूर्देशीयः कृष्णभागवतराख्यः अस्य कलारूपस्योपज्ञाता। प्रवचनं, गीतं, वाद्यम् इत्येतेषां समञ्जसमेलनरूपेयं हरिकथा पण्डितपामरभेदं विना सर्वैरास्वाद्यते।



## पूरक्कलि

उत्तरकेरलानां ग्रामीणकला भवति पूरक्कली। प्रद्युम्ननाम्ना पुनरवतीर्णः कामदेवः रतिसमेतः द्वारकां प्राप। तदानीं स्त्रीपुरुषभेदं विना सर्वे मिलित्वा अनृत्यन्। परन्तु इदानीं पुमांस एवास्मिन् भागं भजन्ते।



विंशतिः वा त्रिंशत् वा पुरुषाः चित्रवस्त्राणि धृत्वा द्वौ सङ्घौ भूत्वा स्पर्धारूपेण इमाम् अवतारयन्ति। अलङ्कृते मण्डपे पीठे दीपं स्थापयित्वा नर्तनम् आरभ्यते। चेण्टा, दुन्दुभिः, इलत्तालं, शंखः, नादस्वरम् इत्येवमादीनां वाद्योपकरणानां साहाय्येन प्रभाते अष्टवादनादारभ्य अपरेद्युः प्रभाते अष्टवादनपर्यन्तम् अनुवर्तते इयं केलिः।

नृत्तगीतसम्मिलितेऽस्मिन् कलाप्रयोगे द्रुतचलनम्, ऊर्ज्वस्वलता च नितरामावश्यकम्। ताण्डवप्रधानेऽस्मिन् कायिकाभ्यासप्रयोगाः अपि सन्ति। महाभारतस्य रामायणस्य च कथाः अवलम्ब्य रचितानि ग्रामीणगीतकानि आलप्यन्ते। अत्र स्पर्धायां प्रत्येकं सङ्घस्य आचार्यौ मिथः धैषणिकसंवादे संस्कृतशास्त्राणाम् अंशान् स्वीकृत्य वादप्रतिवादमपि कुरुतः। एषः वाक्यार्थविचारः एव "मरत्तुकली" इति नाम्ना व्यवह्रियते। एतत्कलारूपम् उत्तरकेरलेषु इदानीमपि प्रचलति।

## कलरिप्पयट्टु

केरलेषु प्रचुरं प्रचार्यमाणा आयोधनकला भवति कलरिप्पयट्टु। आत्मरक्षायै एषा परिकल्पिता। एकादशे शतके चोलराजवंश्यैः साकं युद्धवेलायां सैनिकानां परिशीलनाय 'कलरि' नामकं परिशीलनस्थानं निर्मितमासीत्। केरलेषु प्राचीनविद्यालयाः अपि 'कलरि' इति नाम्ना व्यवह्रियन्ते। मध्याह्नपर्यन्तं शास्त्रपठनम् अनन्तरम् आयोधनपरिशीलनमिति रीतिरत्र स्वीकृता आसीत्। 'खलूरिका' इति संस्कृतपदादेव 'कलरि' इति पदनिष्पत्तिः।





परशुरामः एव अस्याः आयोधनकलायाः प्रणेता इति विश्वासः। केरलसृष्टेरनन्तरं धनुर्विद्यायां प्रबलाः ब्राह्मणाः अस्याम् आयोधनविद्यायां अपि नैपुण्यमार्जितवन्तः। क्रमेण केरलानाम् इतराभिः आयोधनकलाभिः सह मिलित्वा कलरिप्पयट्ट् इति नूतनं रूपं समजायतेति श्रूयते। कूटियाट्टं, कथाकेल्यादिषु कलारूपेष्वपि अनुशीलनविधौ अस्याः कलायाः स्वाधीनता दृश्यते।

**पदच्छेदः**

| | | |
|---|---|---|
| आधुनिकानाञ्च | - | आधुनिकानां + च। |
| रीतिरत्र | - | रीतिः + अत्र। |
| चेति | - | च + इति। |
| सर्वैरपि | - | सर्वैः + अपि। |
| इत्येवम् | - | इति + एवम्। |
| सन्निधावेव | - | सन्निधौ + एव। |
| प्रचारितोऽयं | - | प्रचारितः + अयम्। |
| कलारूपस्योपज्ञाता | - | कलारूपस्य + उपज्ञाता। |
| इत्येभिः | - | इति + एभिः। |
| पञ्चभिरङ्गैः | - | पञ्चभिः + अङ्गैः। |

**पठनप्रवर्तनानि**



❖ हरिकथा, चाक्यार्कूत्त्, पाठकम् इत्येतेषां कलारूपाणां साजात्यवैजात्यानि चर्चित्वा टिप्पणिं लिखत।

**श्रद्धेयाः अंशाः**

- चर्चायां भागित्वम्।
- लेखनम्।
- अवतारणम्।





❖ पूरक्कलि कलारूपे वाक्यार्थविचारः कथमिति पठित्वा उचितं पद्यमादाय कक्ष्यायाम् अवतारयतु।

**श्रद्धेयाः अंशाः**

- उचितानां पद्यानां चयनम्।
- सङ्घेषु वाक्यार्थविचाराय आसूत्रणम्।
- कक्ष्यायामवतारणम्।



❖ उचितानि पद्यानि चित्वा चाक्यार्कूत् रूपेण कक्ष्यायाम् अवतारयतु।

**श्रद्धेयाः अंशाः**

- उचितानां पद्यानां चयनम्।
- सङ्घेषु स्थित्वा चाक्यार्कूत् रूपेण आसूत्रणम्।
- कक्ष्यायाम् अवतारणम्।



❖ परामृष्टग्रन्थान् पठित्वा कलरिप्पयट् इति आयोधकलायाः विशेषतामधिकृत्य चर्चित्वा टिप्पणीं लिखतु।

**श्रद्धेयाः अंशाः**

- परामृष्टग्रन्थानां पठनम्।
- चर्चा।
- टिप्पणीलेखनम्।



## किं कृतम् ?

| ❖ **साजात्यवैजात्यविचिन्तनम्** | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| टिप्पणी लिखिता। | | | |
| कक्ष्यायाम् अवतारितम्। | | | |

| ❖ **वाक्यार्थविचारः** | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| आसूत्रणं कृतम्। | | | |
| कक्ष्यायामवतारितम्। | | | |

| ❖ **चाक्यार्कूत् अवतारणम्** | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| पद्यानां चयनं कृतम्। | | | |
| आसूत्रणं कृतम्। | | | |
| अवतारितम्। | | | |

| ❖ **टिप्पणीलेखनम्** | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| ग्रन्थपठनं कृतम्। | | | |
| चर्चायां भागित्वं कृतम्। | | | |
| टिप्पणी लिखिता। | | | |



कथा

# ८. सुरायाः असुरता

**आमुखम्**

संस्कृतसाहित्ये कथासाहित्यस्य अतीव प्राधान्यमस्ति। उपदेशात्मिकाः विनोददायिकाश्चेति कथायाः द्वैविध्यमस्ति। बृहत्कथा, बृहत्कथामञ्जरी, वेतालपञ्चविंशतिः इत्यादयः विनोददायकाः कथाग्रन्थाः। पञ्चतन्त्रं, हितोपदेशश्च विनोदेन सह उपदेशमपि प्रयच्छतः। मनोरञ्जिकासु जातकमालाकथाः प्रसिद्धाः। श्रीबुद्धदेवस्य पूर्वजन्मकथाः एव जातकमाला अथवा जातककथाः इत्युच्यन्ते। 'जातक' शब्दस्य 'जन्म' इत्यर्थः। ताः कथाः पालिभाषायां रचिताः वर्तन्ते।

कपिलवास्तुनगर्यां राज्ञः शुद्धोदनस्य मायादेव्यां समुत्पन्नः श्रीबुद्धः। ततः पूर्वमेव सः 546 (षट्चत्वारिंशदधिकपञ्चशतम्) जन्मानि स्वीकृतवानिति बौद्धानां विश्वासः। प्रतिजन्म सः नानाविधं प्राणिशरीरमापन्नोऽभवदिति च श्रूयते।

जातकमालायाः कर्ता आर्यशूरः। अस्यां जातकमालायां 34 (चतुस्त्रिंशत्) कथाः सन्ति। गद्यपद्यात्मिकाः भवन्ति ताः कथाः। तासु कथासु "कुम्भजातकम्" नाम कथा पाठ्यांशत्वेनात्र समाकलिता।

पुरा काशीनगर्यां 'सुर'नामकः कश्चन व्याधः आसीत्। सः हिमालयात् वनविभवान् सञ्चित्य विक्रीय च कालं यापयति स्म। एकदा सुरः वृक्षकोटरस्थं जलं पीत्वा आलस्यमनुभवतः पक्षिमृगानपश्यत्। किञ्चित्समयानन्तरं पूर्वाधिकम् उन्मत्तान् तान् जन्तून् पश्यन् सः विस्मितोऽभवत्। वृक्षकोटरस्थस्य जलस्य यः कोऽपि गुणविशेषः स्यादिति विचिन्त्य सोऽपि तज्जलमपिबत्। व्याधः मदोन्मत्तः संवृत्तः। ततः सः मधुसञ्चयनार्थम् आनीते वंशनिर्मिते पात्रे तदुन्मादकं पानीयम् आदाय तस्य सुहृदे वारुणाय संन्यासिने अदात्। सोऽपि उन्मत्तोऽभवत्। क्षणिकसुखमनुभवन्तौ तौ मद्यमादाय राजानम् उपागच्छताम्। मधुपानेन राजापि मदोन्मत्तोऽभवत्। क्रमेण अकल्याणमित्र-सम्पर्कदोषात् सपौरजानपदं मद्यपानप्रसङ्गाभिमुखमभवत्। तस्मादारभ्य 'सुरा', 'वारुणी',



इति मद्यस्य नामनी जाते। सुरापानेन नगरं सर्वतः क्रमशः क्षयोन्मुखं संवृत्तम्। ततः सुरवारुणौ राज्यान्तरं प्रापतुः। तत्रापि तौ मद्यं निर्माय राज्ञे नागरिकेभ्यश्च अयच्छताम्। स देशोऽपि नाशमुपगतः। आरम्भे स्वादिष्ठं सुरापानं क्रमेण श्रेयांस्यपहरति।

इत्थं मद्यविक्रयार्थमटन्तौ तावन्ते श्रावस्तीनगरं प्रापतुः। तदा तत्र सर्वगुणसम्पन्नः सर्वमित्रं नाम राजा शासत् आसीत्। अकल्याणमित्रसम्पर्कदोषात् सोऽपि मद्यपानासक्तोऽभवत्।

बोधिसत्त्वः तदानीं देवाधिपत्यं प्राप्तवानासीत्। यदि भूमौ जनाः सर्वे एवं मद्यं पास्यन्ति तर्हि नूनं सर्वनाशमेष्यन्ति इति मत्वा सः यथाकथञ्चित् तान् ततो निवर्तयितुमैच्छत्। किञ्चिदालोच्य बोधिसत्त्वः ब्राह्मणवेषं धृत्वा राज्ञः सर्वमित्रस्य पुरतः आविर्बभूव। सः तु वामहस्ते सुरापूर्णं नातिबृहन्तं कुम्भं दर्शयित्वा राजानम् उच्चैरवदत् - "इदं क्रीणातु", "इदं क्रीणातु" इति।

अथैनं स राजा विस्मयावर्जितकौतूहलः सन् सबहुमानमीक्षमाणः कृताञ्जलिरपृच्छत् - "बालसूर्य इव दीप्त्या, शशीव चारुतया, मुनिरिव वपुषा च विराजमानः भवान् कः? अस्मिन् कुम्भे किम्? तद् विक्रेतुम् आनीतवान् वा?" इति। एतच्छ्रुत्वा द्विजः प्रत्यवदत् - "राजन्, कुम्भेऽस्मिन् तैलं वा घृतं वा न। मधु वा गुडो वा न। पानीयस्य अस्य प्रभावं शृणोतु - यः इदं पानीयं पिबेत् सः मददोषविह्वलतया स्वच्छन्दश्चरेत्, स्वकुलं विस्मरेत्, बुद्धिभ्रंशेन उन्मत्तो भवेत्, अकारणं रुद्यात्, हसेत्, क्रुध्येत्, कुमार्गेषु चरेच्च। मनश्शरीरे मलिनीभवेताम्। हीनकृत्येषु संलग्नः सः जुगुप्सया, ईर्ष्यया वा जनैः परिहस्येत" इति।

बोधिसत्त्वस्य एतादृशीं वाणीं निशम्य राजा मद्यपानम् अनेकदोषाय भवेदिति विचिन्त्य ततः प्रभृति "मद्यं न पिबेयम्" इति आतिष्ठत। "मद्यं न पेयं न पेयम्" इति घोषणामकरोत्। तस्मादारभ्य सपौरजानपदं नगरं मद्यपानाद् विरराम।

**पदच्छेदः**

| | | |
|---|---|---|
| अथैकदा | - | अथ + एकदा। |
| विस्मितोऽभवत् | - | विस्मितः + अभवत्। |
| सोऽपि | - | सः + अपि। |
| तज्जलमपिबत् | - | तत् + जलम् + अपिबत्। |
| तावन्ते | - | तौ + अन्ते। |
| नातिबृहन्तम् | - | न + अतिबृहन्तम्। |
| उच्चैरवदत् | - | उच्चैः + अवदत्। |
| कृताञ्जलिरुवाच | - | कृताञ्जलिः + उवाच। |
| शशीव | - | शशी + इव। |



| | | |
|---|---|---|
| एतच्छ्रुत्वा | - | एतत् + श्रुत्वा। |
| मुनिरिव | - | मुनिः + इव। |
| नागरिकेभ्यश्च | - | नागरिकेभ्यः + च। |
| स्वच्छन्दश्चरेत् | - | स्वच्छन्दः + चरेत्। |
| श्रोयांस्यपहरति | - | श्रेयांसि + अपहरति। |
| चरेच्च | - | चरेत् + च। |

**विग्रहः**

| | | |
|---|---|---|
| मदोन्मत्तः | - | मदेन उन्मत्तः। |
| राज्यान्तरम् | - | अन्यत् राज्यम्। |
| पानीयम् | - | पातुं योग्यम्। |
| सपौरजानपदम् | - | पुरे भवाः पौराः, जनपदे भवाः जानपदाः, पौरैः जानपदैः च सह वर्तते इति। |
| नातिबृहन्तम् | - | न अतिबृहत्, तम्। |
| विस्मयावर्जितकौतूहलः | - | विस्मयेन आवर्जितं कौतूहलं यस्य सः। |
| सबहुमानम् | - | बहुमानेन सह वर्तते यस्मिन् कर्मणि तद् यथा तथा। |

**व्याकरणविशेषः**

**ततः प्रभृति, तस्मादारभ्य**

प्रभृति, आरभ्य इत्यादीनां योगे पञ्चमी। "कार्तिक्याः प्रभृति आग्रहायणी मासे" इति भाष्यप्रयोगात्।

**मद्यपानात् विरराम** - "जुगुप्साविरामप्रमादार्थानाम् उपसंख्यानम्।" इति पञ्चमी।

**आतिष्ठत** - "आङः प्रतिज्ञायाम्" इति आङ्पूर्वकस्थाधातोः प्रतिज्ञार्थे आत्मनेपदम्।

**नगरं सर्वतः**

"उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु।
द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते।।" इति वार्तिकेन द्वितीया।

**शासत्** - 'शास्' धातोः शतृप्रत्यये शासत् इति रूपम्।



## पठनप्रवर्तनानि



❖ कथामिमां पठित्वा बोधिसत्वस्य सर्वमित्रस्य च मिथः भाषणं सम्भाव्य लिखतु।

**श्रद्धेयाः अंशाः**

- चर्चा।
- लेखनम्।
- अवतारणम्।



❖ "आरम्भे स्वादिष्ठं सुरापानं क्रमेण श्रेयांसि अपहरति।" एतत् वाक्यं सविमर्शं चर्चित्वा उन्मादकवस्तूनां निराकरणोद्बोधनरूपां भित्तिपत्रिकां रचयतु। कक्ष्यायां प्रदर्शयतु।

**श्रद्धेयाः अंशाः**

- चर्चा।
- भित्तिपत्ररचना।
- अवतारणम्।



❖ स्वेच्छानुसारं प्रमेयानि स्वीकृत्य कथां रचयतु। सम्पुटं च निर्मातु।

**श्रद्धेयाः अंशाः**

- प्रमेयमधिकृत्य चर्चा।
- वैयक्तिकं लेखनम्।
- अवतारणम्।
- सम्पुटनिर्माणम्।

# अनुबन्धः

**अमरकोशः**

| | | |
|---|---|---|
| सुरा | - | सुरा हलिप्रिया हाला परिस्रुद्वरुणात्मजा<br>गन्धोत्तमा प्रसन्नेरा कादम्बर्यः परिस्रुता<br>मदिरा कश्यमद्ये। |
| कोटरम् | - | निष्कुहः कोटरम्। |
| व्याधः | - | व्याधो मृगवधाजीवो मृगयुर्लुब्धकोऽपि सः। |
| घृतम् | - | घृतमाज्यं हविस्सर्पिः। |



## किं कृतम् ?

❖ **सम्भाषणरचना**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| सम्भाषणं लिखितम्। | | | |
| कक्ष्यायामवतारणं कृतम्। | | | |

❖ **भित्तिपत्ररचना**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| भित्तिपत्ररचना कृता। | | | |
| कक्ष्यायाम् अवतारणं कृतम्। | | | |

❖ **कथालेखनम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| कथा रचिता। | | | |
| कक्ष्यायाम् अवतारिता। | | | |
| सम्पुटं निर्मितम्। | | | |

एककम् VI

# वास्तुविद्या

## आमुखम्

आतपवृष्ट्यादिभ्यः आत्मानं रक्षितुं सर्वे जन्तवः स्वानुकूलं वासस्थानमिच्छन्ति। केचन जन्तवः गुहासु, केचन नीडेषु, अपरे केचन बिलादिषु च निवसन्ति। आदिममनुष्याः गुहास्ववसन्। कालान्तरे वासार्थं कुटीरगृहहर्म्यादीनि मनुष्यैः निर्मितानि।

शास्त्रान्तरेष्विव गृहनिर्माणविद्यायामपि भारतीयाचार्याः दत्तश्रद्धाः आसन्। वास्तुविद्यायाः आधारः अथर्ववेदस्य उपवेदः स्थापत्यवेदः इति गण्यते। वास्तुविद्या अथवा वास्तुशास्त्रं केरलेषु 'तच्चुशास्त्रम्' इति नाम्ना व्यवह्रियते। शास्त्रविधीन् अनुसृत्य निर्मितेषु गृहेषु निवसन्तः ऐश्वर्यसम्पन्नाः अरोगाश्च भवेयुः इति शास्त्रमेतत् अनुशास्ति। अतः जनाः वास्तुविद्यानुसारं गृहनिर्माणं कुर्वन्ति। केरलेषु एतद्विषयप्रतिपादकः प्रसिद्धः ग्रन्थः भवति श्रीमङ्गलं श्रीनीलकण्ठमूसद् महाशयेन विरचिता मनुष्यालयचन्द्रिका।

जनानां स्वस्थजीवनाय शुद्धो वायुः शुद्धं जलं निरन्तरायप्रकाशश्चात्यन्तमपेक्षितानि। गृहनिर्माणार्थमुपयोक्तव्याः पदार्थाः, परितः रोपणीयाः वृक्षाश्च सुचिन्त्यैव निर्धारणीयाः। गृहस्य आकृतिः, प्रकोष्ठानां, वातायनानां, द्वाराणां, वापीकूपादीनां च स्थानं मानं च वास्तुविद्या निर्दिशति। स्थाननिर्णयाय प्रथमं दिशानिर्णयोऽनिवार्यः। अधुना दिशानिर्णयाय 'दिशासूचकयन्त्रम्' (Magnetic Compass) उपयुज्यते। किन्तु वर्षसहस्रेभ्यः पूर्वमेव वास्तुविद्यायां दिङ्निर्णयः प्रयोगपथमानीतः। सा दिङ्निर्णयरीतिः अस्मिन्नेकके प्रतिपाद्यते।

उपन्यासः

# १. दिशानिर्णयः



गृहनिर्माणार्थं परिगृहीताया भूमेः समीकरणं प्रथमं कार्यम्। ततः समीकृतभूमेः मध्यदेशे शङ्कुस्थापनं करणीयम्। शङ्कुः करार्धायतः, मूले अङ्गुलद्वयविस्तृतः अग्रे एकाङ्गुलविस्तृतः, वर्तुलः, सरोजमुकुलाकाराग्रः सारदारुनिर्मितश्च कल्पनीयः। ततः शङ्कुदैर्घ्ययुगलसम्मितम् आरं कृत्वा भूमौ वृत्तमारचयेत्। तद्वृत्तमध्ये तं शङ्कुं दृढं निवेशयेच्च। प्राह्णान्ते शङ्कुच्छाया वृत्तरेखायां यदा यत्र पतति तदा तत्राङ्कनं कुर्यात्। एवम् अपराह्णेऽपि। परेद्युः प्राह्णान्ते अपि तदनुकुर्यात्। एवं तत्र अङ्कनद्वयं स्यात्। अङ्कनद्वयमध्यगतं भागं त्रिधा विभज्य यो भागः प्रथमदिनबिन्दोः समीपमागच्छति तम् अपराह्णाङ्कितबिन्दुना सह योजयित्वा रेखां रचयेत्। क्षेत्रस्य मध्ये आरचिता इयं रेखा पूर्वपश्चिमरेखा भवति। इयं 'ब्रह्मसूत्र' नाम्ना व्यवह्रियते।




पूर्वपश्चिमरेखायाम् एकैकं बिन्दुम् आधारीकृत्य अन्योन्यमन्तर्गतं वृत्तयुग्ममारचयेत्। तदा वृत्तसङ्गमेन मत्स्यचिह्नं जायते। मत्स्यजठरमार्गेण आरचिता तिर्यग्गता रेखा दक्षिणोत्तराशाप्रभवा भवति। इयं रेखा 'यमसूत्र' नाम्ना व्यवह्रियते।

गृहाणि, प्रासादाश्च एतादृशरीत्या निर्णीतां दिशामाधारीकृत्य उचितस्थानेषु निर्मितानि आसन्। पुरातननगरासूत्रणमपि दिशामनुसृत्य कृतमिति द्रष्टुं शक्यते।

## पदच्छेदः

| | | |
|---|---|---|
| गुहास्ववसन् | - | गुहासु + अवसन्। |
| शास्त्रान्तरेष्विव | - | शास्त्रान्तरेषु + इव। |
| प्रकाशश्चात्यन्तमपेक्षितानि | - | प्रकाशः + च + अत्यन्तम् + अपेक्षितानि। |
| निवेशयेच्च | - | निवेशयेत् + च। |
| अरोगाश्च | - | अरोगाः + च। |
| वृक्षाश्च | - | वृक्षाः + च। |
| सुचिन्त्यैव | - | सुचिन्त्य + एव। |
| दिशानिर्णयोऽनिवार्यः | - | दिशानिर्णयः + अनिवार्यः। |

## विग्रहः।

| | | |
|---|---|---|
| अपराह्णे | - | अह्नः अपरः अपराह्णः, तस्मिन्। |
| दत्तश्रद्धाः | - | दत्ता श्रद्धा यैः, ते। |
| पूर्वाह्णान्ते | - | अह्नः पूर्वं पूर्वाह्णः, तस्य अन्ते। |
| शास्त्रान्तरम् | - | अन्यत् शास्त्रं शास्त्रान्तरम्। |
| दिङ्निर्णयः | - | दिशः निर्णयः। |

## पठनप्रवर्तनानि



❖ दिशानिर्णयमधिकृत्य चर्चां प्रचालयतु। टिप्पणीं लिखित्वा कक्ष्यायामवतारयतु।

**श्रद्धेयाः अंशाः**

- चर्चा।
- टिप्पणीलेखनम्।
- अवतारणम्।



❖ पाठोक्तरीत्या दिशानिर्णयार्थमुपयोक्तव्याः सामग्रीः सञ्चित्य दिशानिर्णयं कुरुत। प्रक्रियां च विशदयत।

**श्रद्धेयाः अंशाः**

- उचितसामग्रीणां चयनम्।
- उचितरीत्या दिशानिर्णयः।
- प्रक्रियालेखनम् अवतारणं च।



❖ वास्तुविषयकाणि लेखनानि पत्रमासिकीभ्यः सञ्चिनोतु। वर्गे अवतारयतु। सम्पुटं च रचयतु।

**श्रद्धेयाः अंशाः**

- उचितं चयनम्।
- अवतारणम्।
- सम्पुटरचना।

## अनुबन्धः

**अमरकोशः**

| | | |
|---|---|---|
| गुहा | - | दरी तु कन्दरो वा स्त्री। देवखातबिले गुहा। |
| गृहं | - | गृहं गेहोदवसितवेश्मसद्मनिकेतनम्। |
| आतपः | - | प्रकाशो द्योत आतपः। |
| दिक् | - | दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः। |
| वर्तुलं | - | वर्तुलं निस्तलं वृत्तम्। |
| वृक्षः | - | वृक्षो महीरुहः शाखी विटपी पादपस्तरुः। |
| वृष्टिः | - | वृष्टिर्वर्षम्। |
| शङ्कुः | - | स्थाणुरस्त्री ध्रुवश्शङ्कुः। |

## किं कृतम् ?

❖ **चर्चा। टिप्पणीलेखनम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| टिप्पणी लिखिता। | | | |
| कक्ष्यायाम् अवतारिता। | | | |

❖ **दिशानिर्णयः**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| सामग्रीणां चयनं कृतम्। | | | |
| उचितरीत्या दिशानिर्णयः कृतः। | | | |
| प्रक्रियां लिखित्वा अवतारितम्। | | | |

❖ **सम्पुटरचना**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| उचितं चयनं कृतम्। | | | |
| अवतारितम्। | | | |
| सम्पुटं निर्मितम्। | | | |

एककम् VII

# मानवधर्मः

**आमुखम्**

मानवधर्मेषु समाजसेवा एव मुख्यो धर्मः। सर्वे विशेषेण संन्यासिनः न तस्यापवादः। एतदाशयबोधनार्थं 'योगिनः समाजसेवकाः' इति पाठः आयोजितः।

तथा च छात्राः शिक्षां निर्वर्त्य जीवनमार्गं प्रविष्टाः किं किं कुर्युः? कथं व्यवहरेयुः? इत्यादि विषयप्रतिपादकः 'दीक्षान्तोपदेशः' इति पाठश्च एककेऽस्मिन्नन्तर्भावितः।

जीवनचरितम्

# १०. योगिनः सर्वसेवकाः



'ईश्वरदर्शनम्' अथवा 'तपोवनचरितम्' नाम ग्रन्थः स्वामिनः तपोवनाचार्यस्य जीवनचरितं भवति। अस्मिन् ग्रन्थे न केवलं स्वामिनः लौकिकजीवनचरितं किन्तु मुमुक्षूणां प्रेरणाप्रदः आध्यात्मिकसाधनामार्गः च उपलभ्यते। संस्कृतभाषायाम् ईदृशः जीवनचरितरूपः ग्रन्थतल्लजः अतिविरलः एव। महात्मा तपोवनस्वामी पालक्काट् मुटप्पल्लूर ग्रामे जनिम् अलभत। पूर्वाश्रमे सुब्रह्मण्यः इति पितृभ्यां कृतनामधेयः चिप्पुक्कुट्टिनाम्ना सर्वैराहूतः। संन्यासदीक्षास्वीकारानन्तरं तपोवनस्वामीति दीक्षानाम्ना प्रसिद्धोऽभवत्। सहृदयः कलारसिकः, अधीतव्याकरणादिशास्त्रः, स्निग्धचित्तः युवा सुब्रह्मण्यः विभाकराख्यं किमपि खण्डकाव्यं विरचयामास। विष्णुयमकं, कैलासयात्रा, हिमगिरिविहारः, बदरीस्तोत्रम् इत्यादयः प्रशस्ताः ग्रन्थाः अपि तेन विरचिता उपलभ्यन्ते। विश्वविश्रुतायाः चिन्मयमिशन् इत्याख्यायाः संस्थायाः स्थापकस्य सन्न्यासिश्रेष्ठस्य स्वामिनः चिन्मयानन्दस्यायं गुरुः।

स्वामिनः तपोवनस्य तीर्थयात्राप्रसङ्गे विभिन्नबुद्धिगतयो विभिन्नश्रेणीकाः जनाः बहवस्तत्रापि सन्दर्शनार्थिनः सम्मिलिता आसन्। ततः धृष्टतया निःसङ्कोचमप्राक्षीत् स्वामिनमत्र कश्चित् - "विजनवनप्रदेशेषु निवसन्तो भवादृशाः किं कुर्वन्ति? अधस्तनदेशेषु जनबहुलेषु यत्रकुत्रचिदवस्थाय देशशुश्रूषणपरं कर्म कुतो न कुर्वन्ति?" इति। स्वामिनो विनम्रं प्रतिवचनमेवमासीत् - "सम्यक् स्मारितं भवता। अत्र स्थित्वैव वयमस्मद्देशं सेवामहे। अध्यात्मानुभवनिष्ठाभ्यासोऽध्यात्मविद्योपदेशश्च

स्वानुभवमुखेन शास्त्रमुखेन च यत्किञ्चित् क्रियते अस्माभिर्यत्रकुत्रापि स्थित्वा, तेन यादृशी देशोपकृतिः, तादृशी न केनचिदन्येन कर्मणा सिद्ध्यति। आत्मशान्तिरेव महान् सुरनदीह्लदः अस्मिन् दुःखाग्निसन्तप्ते संसारे। सर्वे पुरुषार्थाः तदर्थमेव क्रियन्ते लौकिकप्रज्ञैः शास्त्रीयप्रज्ञैश्च वित्तपदादिसम्पादनविषयका अपि। अहो! आत्मशान्तिरात्यन्तिकी कुत्राप्यलभ्यमाना अमूल्यनिधिरिव सर्वस्पृहणीया यदि लभ्यते जनैः अनायासेन देववन्द्येन निजशान्तोपरतजीवनमात्रेण, तर्हि लोकानां तेभ्यो महात्मभ्योऽधिकतरकल्याणकारिणो लोके के भवन्तीति न वयं जानीमहे। आत्मक्रीडा, आत्मरतयस्तादृशा महर्षयः कुत्रापि निवसन्तु, पर्वतमस्तके, विविक्ते, गुहायां वा ते खलु भुवनस्यानर्घमतिशोभनं विभूषणमिति विजानीहि" इति। (ईश्वरदर्शनम् - पृष्ठसंख्या - २७९)

**अन्वयः**

**सर्वे पुरुषार्थाः....................... अपि।**

वित्तपदादिसम्पादनविषयकाः सर्वे अपि पुरुषार्थाः लौकिकप्रज्ञैः शास्त्रीयप्रज्ञैश्च तदर्थमेव क्रियन्ते।

**अहो....................... जानीमहे।**

अहो कुत्राप्यलभ्यमाना अमूल्यनिधिरिव सर्वस्पृहणीया आत्यन्तिकी आत्मशान्तिः देववन्द्येन निजशान्तोपरतजीवनमात्रेण जनैः अनायासेन यदि लभ्यते तर्हि लोकानां तेभ्यः महात्मभ्यः अधिकतरकल्याणकारिणः लोके के भवन्तीति वयं न जानीमहे।

**टिप्पणिः**

आत्मशान्तिरात्यन्तिकी - आत्मशान्तिरात्यन्तिकी कुत्राप्यलभ्यमाना अमूल्यनिधिरिव सर्वस्पृहणीया भवति। सा अनायासेन देववन्द्येन निजशान्तोपरतजीवनमात्रेण लभ्यते इति महात्मानः बोधयन्ति स्वयं तथा अनुतिष्ठन्तः। सा यदि लभ्यते महात्मनां सकाशात् जनैः तर्हि।

आत्मक्रीडाः, आत्मरतयः - तेषां सुखं विनोदश्च बाह्यपदार्थनिरपेक्षः भवति।

तत्र विनोदस्य सुखस्य च विषयः साधनं च आत्मैव नान्य इति यावत्।

**पदच्छेदः**

| | | |
|---|---|---|
| बहवस्तत्रापि | - | बहवः + तत्र + अपि। |
| स्थित्वैव | - | स्थित्वा + एव। |
| अध्यात्मविद्योपदेशश्च | - | अध्यात्मविद्योपदेशः + च। |
| अस्माभिर्यत्र | - | अस्माभिः + यत्र। |
| आत्मशान्तिरेव | - | आत्मशान्तिः + एव। |
| शास्त्रीयप्रज्ञैश्च | - | शास्त्रीयप्रज्ञैः + च। |

आत्मशान्तिरात्यन्तिकी - आत्मशान्तिः + आत्यन्तिकी।
कुत्राप्यलभ्यमाना - कुत्रापि + अलभ्यमाना।
अमूल्यनिधिरिव - अमूल्यनिधिः + इव।
महात्मभ्योऽधिकतरकल्याणकारिणः - महात्मभ्यः + अधिकतरकल्याणकारिणः।
भवन्तीति - भवन्ति + इति।
आत्मरतयस्तादृशाः - आत्मरतयः + तादृशाः।

**विग्रहः**

तीर्थयात्राप्रसङ्गे - तीर्थेषु यात्रा - तीर्थयात्रा, तीर्थयात्रायाः प्रसङ्गः, तस्मिन्।
विभिन्नबुद्धिगतयः - बुद्धेः गतयः बुद्धिगतयः, विभिन्नाः बुद्धिगतयः येषां ते।
विभिन्नश्रेणीकाः - विभिन्नाः श्रेण्यः येषां ते।
सन्दर्शनार्थिनः - सन्दर्शनम् अर्थयन्ते इति।
धृष्टतया - धृष्टस्य भावः, तया।
निःसङ्कोचम् - निर्गतः सङ्कोचः यस्मिन् कर्मणि तद् यथा तथा।
अध्यात्मानुभवनिष्ठाभ्यासः - आत्मनि इति अध्यात्मम्, अध्यात्मम् अनुभवः अध्यात्मानुभवः, तस्मिन् निष्ठा, तस्याः अभ्यासः।
अध्यात्मविद्योपदेशः - अध्यात्मं विद्या अध्यात्मविद्या, तस्या उपदेशः।
स्वानुभवद्वारा - स्वस्य अनुभवः स्वानुभवः, तस्य द्वाः, तेन।
शास्त्रद्वारा - शास्त्रमेव द्वाः, तेन।
सुरनदीह्रदः - सुरनद्याः ह्रदः।
दुःखाग्निसन्तप्ते - दुःखमेव अग्निः, तेन सन्तप्तः, तस्मिन्।
पुरुषार्थाः - पुरुषैः अर्थ्यन्ते इति।
वित्तपदादिसम्पादनविषयकाः - वित्तं पदम् आदिः येषां ते वित्तपदादयः, तेषां सम्पादनं तदेव विषयः येषां ते।
आत्मशान्तिः - आत्मनः शान्तिः।
आत्यन्तिकी - अत्यन्तं भवा।
अलभ्यमाना - न लभ्यमाना।
अमूल्यनिधिः - न विद्यते मूल्यं यस्य सः अमूल्यः, अमूल्यश्चासौ निधिः च।

सर्वस्पृहणीया - स्पृहयितुं योग्या स्पृहणीया, सर्वैः स्पृहणीया।

देववन्द्येन - देवैः वन्द्यः, तेन।

निजशान्तोपरतजीवनमात्रेण - निजं शान्तञ्च उपरतं (सर्वतो निवृत्तम्) च जीवनमात्रं तेन।

अधिकतरकल्याणकारिणः - अतिशयेन अधिकम्, अधिकतरं कल्याणं कुर्वन्ति इति।

आत्मक्रीडाः - आत्मनि क्रीडा (विनोदः) येषां ते।

आत्मरतयः - आत्मनि रतिः (सुखम्) येषां ते।

अनर्घम् - न विद्यते अर्घः यस्य तत्।

अतिशोभनम् - अतिशयितं शोभनम्।

**पदार्थः**

प्रसङ्गे - सन्दर्भे।

दुःखाग्निः - दुःखमेव अग्निः।

सन्तप्तः - नितरां तप्तः।

संसारः - प्रपञ्चः।

प्रज्ञैः - सुधीभिः, पण्डितैः।

विभिन्नश्रेणीकाः - नानाविधपङ्क्तिगताः।

धृष्टतया - अहङ्कारेण।

अप्राक्षीत् - अपृच्छत्।

वित्तपदादिसम्पादनविषयकाः - धनस्थानादिसम्पादनोद्देश्यकाः।

आत्यन्तिकी - निस्सीमा।

उपकृतिः - उपकारः।

अधस्तनदेशेषु - निम्नदेशेषु।

सुरनदी - गङ्गानदी।

ह्रदः - अगाधजलाशयः।

अलभ्यमानाः - लब्धुमशक्याः।

पर्वतमस्तके - पर्वतशृङ्गे।

विविक्ते - एकान्ते, विजने।

अतिशोभनं - अतिमनोहरम्, अत्यन्तं शोभनम्।

विभूषणं - विशिष्टं भूषणं (अलङ्कारः)।

अनर्घम् - अमूल्यम्।

## पठनप्रवर्तनानि



❖ स्वामिना उक्तां देशसेवामधिकृत्य कक्ष्यायां वाक्यार्थसंवादं प्रचालयतु। आशयं क्रोडीकृत्य लिखित्वा अवतारयतु।

**श्रद्धेयाः अंशाः**

- पदार्थनिर्धारणद्वारा वाक्यार्थसंवादप्रचालनम्।
- क्रोडीकृत्य लेखनम्।
- अवतारणम्।



❖ स्वेनानुष्ठितां समाजसेवामधिकृत्य चर्चित्वा लघुविवरणं रचयतु। कक्ष्यायाम् अवतारयतु।

**श्रद्धेयाः अंशाः**

- चर्चा।
- विवरणस्य रचना।
- अवतारणम्।

## किं कृतम् ?

❖ **वाक्यार्थसंवादः**

भागभागित्वम्।

क्रमीकृत्य लेखनम्।

अवतारणम्।

| पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|
| | | |
| | | |
| | | |

❖ **लघुविवरणम्**

चर्चायां भागभागित्वम्।

विवरणस्य रचना।

अवतारणम्।

| पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|
| | | |
| | | |
| | | |

विवरणम्

# ११. दीक्षान्तोपदेशः

**आमुखम्**

उपनिषदः विश्वमानविकतायाः प्रोद्घोषिकाः जगत्प्रदीपिकाः च भवन्ति। भारतीयसंस्कृतेः आधारतया प्रकीर्त्यमानानि मूल्यानि उपनिषदः योगदानानि। सर्वचराचराणां योगक्षेमपराणि उपनिषत्तत्त्वानि प्रकृतेः सुस्थिरविकासाय च अत्यन्तमुपादेयानि।

सनातनधर्मस्य प्रमाणग्रन्थाः वेदाः पूर्वभागः उत्तरभाग इति द्विधा विभक्ताः। पूर्वभागः कर्मकाण्डः, उत्तरभागः ज्ञानकाण्डश्च। वेदस्य अन्तिमावयवाः उपनिषदः वेदान्त इत्यपि उच्यन्ते। आत्मविद्याप्रतिपादिका अनेका उपनिषदः प्रचलिता दृश्यन्ते। तासु प्रसिद्धानां दशोपनिषदां भाष्यं शङ्कराचार्यैः विरचितम्। ताश्च दशोपनिषदः -

**ईशकेनकठप्रश्नमुण्डमाण्डूक्यतितित्तिरिः।**
**ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश।। इति।।**

कृष्णयजुर्वेदान्तर्गतायाः तैत्तिरीयोपनिषदः शिक्षावल्लीनामकात् प्रथमभागात् उद्धृतः एकादशोऽनुवाकः अत्र प्रस्तूयते। समाप्तविद्यं शिष्यं प्रचोदयितुं गुरोरुपदेशरूपोऽयं भागः। स्वस्य व्यक्तित्वविकासः, परिवारबन्धः, समाजे तस्य कर्तव्यं चेति गृहस्थाश्रमिणः आवश्यकाः विषयाः उपदेशरूपेणात्र प्रदीयन्ते। छात्रस्य समग्रविकास एव प्राक्तनशिक्षालक्ष्यम् इति अस्मात् द्रष्टुं शक्यते।



## मूलम्

*वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति। सत्यं वद। धर्मं चर। स्वाध्यायान्मा प्रमदः। आचार्याय प्रियं धनमाहृत्य प्रजातन्तुं मा व्यवच्छेत्सीः। सत्यान्न प्रमदितव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम्। स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याभ्यां न प्रमदितव्यम्।*

## पदच्छेदः

| | |
|---|---|
| वेदमनूच्याचार्योऽन्तेवासिनमनुशास्ति | - वेदम् + अनूच्य + आचार्यः + अन्तेवासिनम् + अनुशास्ति। |
| स्वाध्यायान्मा | - स्वाध्यायात् + मा। |
| सत्यान्न | - सत्यात् + न। |
| धर्मान्न | - धर्मात् + न। |
| कुशलान्न | - कुशलात् + न। |

**व्याख्या**

वेदम् - ज्ञेयं सर्वं विषयम्। वेदग्रन्थं वा।

अनूच्य - अध्याप्य।

आचार्यः - गुरुः।

अन्तेवासिनम् - शिष्यम्। (समीपे उषितवन्तम्।)

अनुशास्ति - उपदिशति।

सत्यं वद - ऋतं ब्रूहि। यत् सत् तत् सत्यम्।

धर्मं चर - धर्मम् अनुतिष्ठ। 'यतोऽभ्युदयनिश्रेयसे स धर्मः'। धर्ममार्गेण गच्छ। व्यक्तिपरिवारसमाजानां कृते हितकर्माणि कुरु।

स्वाध्यायात् - स्वस्य वेदस्याध्ययनात्।

मा प्रमदः - प्रमादं मा कुरु। 'प्रमादोऽनवधानता'। श्रद्धालुर्भव इत्यर्थः।

आचार्याय - गुरवे।

प्रियं धनं - इष्टं द्रव्यम्। गुरुदक्षिणारूपम्।

आहृत्य - आनीय दत्त्वा।

प्रजातन्तुं - सन्ततिपरम्पराम्।

मा व्यवच्छेत्सीः - मा छिन्धि। गृहस्थाश्रमं स्वीकृत्य सन्ततिपरम्परां पालयतु।

सत्यान्न प्रमदितव्यम् - मनसा वाचा कर्मणा अनृतं न कर्तव्यम्।

धर्मान्न प्रमदितव्यम् - सच्चरितेभ्यः न व्यतिचलितव्यम्।

कुशलान्न प्रमदितव्यम् - आत्मरक्षणार्थं यः प्रयत्नः आवश्यकः स एव कुशलः। तस्मिन् अनवधानता न कार्या।

भूत्यै न प्रमदितव्यम् - भूतिः ऐश्वर्यम्। तत्सम्पादनार्थम् आवश्यकः यः प्रयत्नः तत्र श्रद्धा विधेया। (भूत्यर्थात्कर्मणः प्रमादो न कार्यः)।

स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम् - अध्ययनात् अध्यापनाच्च न व्यतिचलितव्यम्।

देवपितृकार्याभ्यां न प्रमदितव्यम् - यज्ञादिदेवकार्येभ्यः तर्पणादिपितृकार्येभ्यश्च न व्यतिचलितव्यम्। (मानवसेवादिकमपि देवकार्यम्। पित्रोः लक्ष्य-पूरणमपि पितृकार्यम् एव। तत्र श्रद्धा कार्या।)

**विग्रहः**

अन्तेवासी - अन्ते वस्तुं शीलम् अस्यास्तीति।

आचार्यः - आचिनोत्यर्थान् इत्याचार्यः, आचारं ग्राहयति वा।

वेदः - विद्यते (ज्ञायते) अनेनेति वेदः। विद्यते इति वेदः (ज्ञानम्)।

**आशयः** - गुरुः समाप्तविद्यं शिष्यं गृहस्थाश्रमाय प्रेरयति। तदर्थमुपदेशान् ददाति। त्वं सर्वदा सत्यं ब्रूहि। सच्चरितानि कुरु। स्वेनाधीतकार्येभ्यः न व्यतिचलेः। गुरवे प्रियां दक्षिणां दद्याः। गृहस्थाश्रमं स्वीकृत्य सन्ततिपरम्परां पालयेः। कदापि सत्यान्न व्यतिचलेः। सदा सच्चरितानि कर्तव्यानि। आत्मरक्षणोपायेषु श्रद्धालुः भवेः। धनाद्यैश्वर्यदायकेभ्यः कर्मभ्यः न व्यतिचलेः। अध्ययनाध्यापनकर्मभ्यः व्यतिचलितो मा भूः। ईश्वरप्रीतिजनकं पितृप्रीतिजनकं च कर्म अनुतिष्ठ।

## मूलम्

*मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यान्यनवद्यानि कर्माणि तानि सेवितव्यानि। नो इतराणि। यान्यस्माकं सुचरितानि तानि त्वयोपास्यानि। नो इतराणि। ये के अस्मच्छ्रेयांसो ब्राह्मणाः, तेषां त्वयासनेन प्रश्वसितव्यम्। श्रद्धया देयम्। अश्रद्धयाऽदेयम्। श्रिया देयम्। ह्रिया देयम्। भिया देयम्। संविदा देयम्।*

**पदच्छेदः**

मातृदेवो भव - मातृदेवः + भव।

पितृदेवो भव - पितृदेवः + भव।

आचार्यदेवो भव - आचार्यदेवः + भव।

यान्यनवद्यानि - यानि + अनवद्यानि।

यान्यस्माकम् - यानि + अस्माकम्।

त्वयोपास्यानि - त्वया + उपास्यानि।

अस्मच्छ्रेयांसो ब्राह्मणाः - अस्मत् + श्रेयांसः + ब्राह्मणाः।

त्वयासनेन - त्वया + आसनेन।

अश्रद्धयाऽदेयम् - अश्रद्धया + अदेयम्।

**व्याख्या**

| | | |
|---|---|---|
| मातृदेवः | - | मातरं देवरूपेण यः उपास्ते सः। |
| पितृदेवः | - | पितरं देवरूपेण यः उपास्ते सः। |
| आचार्यदेवः | - | आचार्यं देवरूपेण यः उपास्ते सः। |
| अतिथिदेवः | - | अतिथिं देवरूपेण यः उपास्ते सः। |
| भव | - | त्वं (मातृपित्राचार्यातिथिभक्तो) भव। |
| यानि अनवद्यानि | - | यानि अनिन्द्यानि। निर्दोषाणि। |
| कर्माणि | - | आचाराः। |
| तानि सेवितव्यानि | - | तानि त्वयाऽपि कर्तव्यानि। |
| यानि अस्माकं | - | यानि नः (गुरूणाम्)। |
| सुचरितानि | - | शोभनचरितानि। सुचेष्टितानि। |
| तानि | - | सुचरितानि। |
| त्वया | - | शिष्येण। |
| नो इतराणि | - | अन्यानि दुश्चरितानि न कर्तव्यानि। |
| उपास्यानि | - | अनुष्ठेयानि। |
| ये के अस्मत् | - | ये के तव गुरुभ्यः। |
| श्रेयांसः | - | प्रशस्यतराः। वयोविद्याचारतपस्सु प्रशस्यतराः। |
| ब्राह्मणाः | - | ब्रह्मज्ञानिनः (भवन्ति)। |
| तेषां | - | तादृशानां श्रेष्ठानाम्। |
| त्वया | - | भवता (शिष्येण)। |
| आसनेन | - | उपवेशनेन। |
| प्रश्वसितव्यम् | - | अर्घ्यपाद्यादिकैश्च श्रमयापनं कर्तव्यम्। |
| श्रद्धया | - | देशकालपात्रादीन् ज्ञात्वा स्वविभवानुसारं सबहुमानम् आस्तिक्यबुद्ध्या। |
| देयम् | - | दातव्यम्। |
| अश्रद्धया | - | पूर्वोक्तविरुद्धतया। अनादरेण अनवधानतया च। |
| अदेयम् | - | न दातव्यम्। |

| | | |
|---|---|---|
| श्रिया देयम् | - | ऐश्वर्येण, सम्पदा देयम्। |
| ह्रिया देयम् | - | लज्जया देयम्। विनयेन वा। सर्वा अपि सम्पदः ईश्वराधीनाः भवन्ति, तथाप्यहं ददामीति चिन्ता एव लज्जायाः हेतुः। |
| भिया देयम् | - | भीत्या देयम्। दानस्वीकर्ता अपि ईश्वरः इति भीतेः कारणम्। |
| संविदा देयम् | - | मित्रादिकार्येण। मित्राणाम् आवश्यकज्ञानपूर्वकम्। यथार्थज्ञानेन दातव्यम्। |

**विग्रहः**

| | | |
|---|---|---|
| मातृदेवः | - | माता देवः यस्य सः। |
| पितृदेवः | - | पिता देवः यस्य सः। |
| आचार्यदेवः | - | आचार्यः देवः यस्य सः। |
| अतिथिदेवः | - | न विद्यते तिथिः यस्य स अतिथिः, सः देवः यस्य सः। |
| अदेयम् | - | दातुं योग्यं देयम्, न देयम्। |
| सुचरितानि | - | शोभनानि चरितानि। |

**आशयः -** पुत्र! त्वं मातरं पितरम् आचार्यम् अतिथिञ्च देवरूपेण शुश्रूषस्व। अनिन्द्यानि कर्माणि कर्तव्यानि। निन्द्यकर्माणि न कर्तव्यानि। भवतः गुरूणां सुचरितानि अनुकरणीयानि। तेषां कुचरितानि त्याज्यानि। वयसा तपसा विद्यया आचरणेन च अस्मदपेक्षया प्रशस्यतरान् सर्वथा पूजय। तेभ्यः अर्घ्यपाद्यादिकं देहि। श्रान्तिम् अपाकुरु। श्रद्धया दानं कर्तव्यम्। अश्रद्धया न कर्तव्यम्। सम्पदा सह दानं कर्तव्यम्। निन्दाहङ्कारादिकं विना विनयपूर्वकं दानं कर्तव्यम्। पात्राणाम् आवश्यकताज्ञानपूर्वकं दानं कर्तव्यम्।

## मूलम्

*अथ यदि ते कर्मविचिकित्सा वा वृत्तविचिकित्सा वा स्यात्, ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षा धर्मकामाः स्युः, यथा ते तत्र वर्तेरन्, तथा तत्र वर्तेथाः। अथाभ्याख्यातेषु ये तत्र ब्राह्मणाः सम्मर्शिनः, युक्ता आयुक्ताः, अलूक्षाः धर्मकामाः स्युः। यथा ते तेषु वर्तेरन्। तथा तेषु वर्तेथाः। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। एतदनुशासनम्। एवमुपासितव्यम्। एवमु चैतदुपास्यम्।*



**पदच्छेदः**

| | | |
|---|---|---|
| अथाभ्याख्यातेषु | - | अथ + अभ्याख्यातेषु। |
| एष आदेशः | - | एषः + आदेशः। |
| एष उपदेशः | - | एषः + उपदेशः। |
| चैतदुपास्यम् | - | च + एतत् + उपास्यम्। |

**व्याख्या**

| | | |
|---|---|---|
| अथ | - | पूर्वोक्तप्रकारम् अनुष्ठानेऽपि। |
| ते | - | तव। |
| कर्मविचिकित्सा | - | कर्तव्ये संशयः। श्रौतस्मार्तादिकर्मसु सन्देहः। ('विचिकित्सा तु संशयः'।) |
| वा | - | भवति चेत्। |
| वृत्तविचिकित्सा | - | आचारेषु सन्देहः। |
| वा स्यात् | - | यदि। |
| तत्र | - | तत्तद्देशेषु कालेषु च। |

सम्मर्शिनः - विचारशीलाः।

युक्ताः - अभियुक्ताः। सत्कर्मसु सदाचारेषु निरताः।

आयुक्ताः - परप्रेरणारहिताः। अन्येषां प्रेरणां विनैव स्वकर्मसु निरताः।

धर्मकामाः - धर्मपालने तत्पराः।

अलूक्षाः - अक्रूरहृदयाः, प्रेमशीलाः।

ब्राह्मणाः - ब्रह्मज्ञानिनः। विवेकशालिनः।

ये स्युः - ये भवेयुः।

तत्र - तस्मिन् स्थाने काले च।

ते - पूर्वोक्तगुणविशिष्टाः ब्राह्मणाः।

यथा वर्तेरन् - यथा कुर्युः (कर्मणि आचारे वा)।

तथा - तद्वत्।

तत्र - तादृशेषु अवसरेषु।

वर्तेथाः - भवेः। अनुतिष्ठेः।

अथ - ततः।

अभ्याख्यातेषु - दोषशङ्कायुक्तेषु। दुर्जनेषु वा।

तत्र - तेषां विषये।

सम्मर्शिनः युक्ता आयुक्ताः
अलूक्षा धर्मकामाः ब्राह्मणाः ये स्युः - ये पूर्वोक्तगुणविशिष्टाः।

ते - ब्राह्मणाः।

तेषु - अभ्याख्यातेषु।

यथा वर्तेरन् - येन प्रकारेण कुर्युः।

तथा - तेन प्रकारेण एव।

तेषु वर्तेथाः - तेषां विषये (त्वमपि) कुर्याः।

एषः - पूर्वोक्तः। 'सत्यं वद' इत्यस्मात् प्रभृति 'तेषु तथा वर्तेथाः' इति यावत्।

आदेशः - विधिः। अज्ञातार्थज्ञापनं विधिः।

एष उपदेशः - एष उपदेशात्मकः। 'प्रत्यक्षमाख्यानमुपदेशः'।

एषा वेदोपनिषत् - वेदसारः। (वेदस्य रहस्यविद्या।)

एतत् अनुशासनम् - एतत् ईश्वरवचनम्।
एवम् उपासितव्यम् - एवंप्रकारेण उपासनीयम्। श्रद्धया करणीयम्।
एतत् एवम् उपास्यं च - एवम् उपासितव्यं च।
उ - एव। निश्चयेन इत्यर्थः। उपासितव्यम् उपास्यम् इति द्विवारकथनम् अनुवाकसमाप्तिम् आदरं च सूचयति।

**विग्रहः**

कर्मविचिकित्सा - कर्मणि विचिकित्सा।

वृत्तविचिकित्सा - वृत्ते विचिकित्सा।

सम्मर्शिनः - सम्यक् मर्शिनः।

धर्मकामाः - धर्मे कामः येषां ते।

**आशयः -** पूर्वोक्तप्रकारेणानुष्ठाने तव कर्तव्ये आचारे वा शङ्का जायते चेत् तस्मिन् काले देशे च, सदाचारनिरताः, धर्मतत्पराः, अक्रूरहृदयाः, विवेकशालिनः (ब्रह्मज्ञानिनः) अनुकरणादर्शतया ग्राह्याः। अर्थात् तादृशेषु अवसरेषु पूर्वोक्तगुणविशिष्टाः ज्ञानिनः किं कुर्वन्ति इति वीक्ष्य त्वमपि तदनुकुरुष्व। एवं दोषशङ्कायुक्तेष्वपि विवेकशालिनः ब्रह्मज्ञानिनः येन प्रकारेण प्रवर्तन्ते त्वमपि तेषु तथा कुरु। एषः विधिः। एष उपदेशः। एष एव वेदोपनिषत्सारः। एतदेवेश्वरवचनम्। एवमेव श्रद्धया करणीयम्।

## पठनप्रवर्तनानि



❖ उपनिषदुक्तसमानाशयप्रतिपादकानि सुभाषितानि सञ्चित्य सत्यं, दानं, धर्मं, परोपकारः इत्यादि विषयभेदेन वर्गीकृत्य कक्ष्यायामवतारयतु।

**श्रद्धेयाः अंशाः**

- श्लोकानां चयनम्।
- विषयबन्धितया क्रमीकरणम्।
- कक्ष्यायामवतारणम्।



❖ पाठभागात् वैयक्तिक - पारिवारिक - सामाजिकसम्बन्धिनः उपदेशान् पठित्वा प्राचीनशिक्षापद्धत्याः लक्ष्यं शोभनसमाजसंस्थापनमिति समर्थयत।

**श्रद्धेयाः अंशाः**

- चर्चा, क्रोडीकरणं च।
- समर्थनम्।
- अवतारणम्।



❖ दशम्याः कक्ष्यायाः पठनान्ते भवता चिकीर्षितां प्रतिज्ञां विलिख्य अवतारयतु। तदन्तर्जालिकायां योजयतु।

**श्रद्धेयाः अंशाः**

- प्रतिज्ञायाः लेखनम्।
- अवतारणम्।
- अन्तर्जालिकायां योजना।



❖ आरोग्यसर्वकलाशालायाः दीक्षान्तसमारोहस्य चित्रं निरीक्ष्य चर्चित्वा वृत्तान्तपत्रेषु प्रकाशनाय तत्र प्रवृत्तस्य कार्यक्रमस्य विवरणमेकं विलिख्य कक्ष्यायामवतारयतु।

**श्रद्धेयाः अंशाः**

- चित्रस्य निरीक्षणम्।
- चर्चा।
- विवरणरूपेण कार्यक्रमस्य लेखनम्।
- अवतारणम्।



# अनुबन्धः

**अमरकोशः**

| | | |
|---|---|---|
| सत्यम् | - | सत्यं तथ्यमृतं सम्यक्। |
| माता | - | जनयित्री प्रसूर्माता जननी....। |
| पिता | - | तातस्तु जनकः पिता। |
| धनं | - | द्रव्यं वित्तं स्वापतेयं रिक्थमृक्थं धनं वसु।<br>हिरण्यं द्रविणं द्युम्नम् अर्थं रै विभवा अपि। |
| अतिथिः | - | स्युरावेशिकः आगन्तुः अतिथिर्ना गृहागते। |
| ह्रीः | - | मन्दाक्षं ह्रीस्त्रपा व्रीडा लज्जा.........। |
| भीः | - | .....दरस्त्रासो भीतिर्भीः साध्वसं भयम्। |
| संवित् | - | प्रेक्षोपलब्धिश्चित् संवित् प्रतिपत्ज्ञप्तिचेतनाः। |
| उपासनम् | - | वरिवस्या तु शुश्रूषा परिचर्याप्युपासनम्। |

**व्याकरणविशेषः**

सत्यान्न प्रमदितव्यम्। "जुगुप्साविरामप्रमादार्थानामुपसंख्यानम्" इति पञ्चमी।

मा व्यवच्छेत्सीः - वि + अव + छिदिर् द्वैधीकरणे (to split) धातोः लुङ्। वि + अव + अछैत्सीः। 'माङि लुङ्'। 'न माङ्योगे' इत्यडागमनिषेधः व्यवच्छैत्सीः। व्यवच्छेत्सीः इति वैदिकं रूपम्।

मा प्रमदः - प्र पूर्वक 'मदी हर्षे' धातोः लुङि म. पु. ए. व. (प्रामदः) 'माङि लुङ्'। 'न माङ् योगे' इति अडभावः प्रमदः।

# अधिकवाचनांशः

**कृष्णयजुर्वेदः -**

तैत्तिरीयोपनिषद् यजुर्वेदस्य तैत्तिरीयशाखायाः (कृष्णयजुर्वेदस्य) उपनिषद् भवति। तैत्तिरीय-शाखायाः उत्पत्तिमधिकृत्य श्रीमद्भागवते परामर्शोऽस्ति। वैशम्पायनशिष्यः याज्ञवल्क्यः गुरुकोपेन आर्जितान् अखिलान् वेदांशान् अवमत्। वैशम्पायनस्य इतरे शिष्याः तित्तिरिपक्षिणां रूपं स्वीकृत्य तदुच्छिष्टं सर्वम् अभुञ्जत। तत् तैत्तिरीयशाखेति नाम्ना प्रसिद्धः कृष्णयजुर्वेदः। (द्वादशः स्कन्धः)

**आचार्यः -** आचिनोति हि शास्त्रार्थान् आचारे स्थापयत्युत।
स्वयमाचरते यस्तु तमाचार्यं प्रचक्षते।।

## किं कृतम् ?

❖ **सुभाषितचयनम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| सुभाषितसञ्चयः कृतः। | | | |
| विषयभेदेन वर्गीकृतः। | | | |
| कक्ष्यायामवतारितम्। | | | |

❖ **उपन्यासरचना**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चर्चायां भागो गृहीतः। | | | |
| समर्थनं कृतम्। | | | |
| कक्ष्यायाम् अवतारितम्। | | | |

❖ **प्रतिज्ञालेखनम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| प्रतिज्ञा लिखिता। | | | |
| कक्ष्यायामवतारितम्। | | | |
| अन्तर्जालिकायां निवेशितम्। | | | |

❖ **विवरणलेखनम्**

| | पूर्णतया | भागिकतया | क्लेशनिर्देशः |
|---|---|---|---|
| चित्रस्य निरीक्षणं कृतम्। | | | |
| विवरणरूपेण कार्यक्रमः लिखितः। | | | |
| कक्ष्यायाम् अवतारणं कृतम्। | | | |

# Vocabulary

## Lesson 1

| Sanskrit | Sanskrit | English | Malayalam | Kannada | Tamil |
|---|---|---|---|---|---|
| श्रेष्ठी | वणिक् | merchant | കച്ചവടക്കാരൻ | ವ್ಯಾಪಾರಿ | வியாபாரி |
| पञ्चत्वं प्राप | मृतः | passed away | മരിച്ചു | ತೀರಿಕೊಂಡರು | இறந்தார் |
| ज्ञातयः | बान्धवाः | kinsmen | ബന്ധുക്കൾ | ಬಾಂಧವರು | உறவினர்கள் |
| उषितवती | वासं कृतवती | dwelt | താമസിച്ചിരുന്നവൾ | ವಾಸಿಸುತ್ತಿದ್ದಳು | குடியிருந்தவள் |
| असूत | असूयत | delivered | പ്രസവിച്ചു | ಜನ್ಮನೀಡಿದಳು | பிரசவித்தாள்/பெற்றெடுத்தாள் |
| पाटवम् | सामर्थ्यम् | skill | നൈപുണി | ಸಾಮರ್ಥ್ಯ | திறமை |
| अर्थ्यताम् | अभ्यर्थना क्रियताम् | may be asked or requested | അഭ്യർത്ഥിച്ചാലും | ಪ್ರಾರ್ಥಿಸು | வேண்டிக்கொண்டாலும் |
| प्रातिष्ठत | प्रस्थानमकरोत् | set forth | പുറപ്പെട്ടു | ಹೊರಟನು | புறப்பட்டார் |
| चणकः | हरिमन्थकः | peanut | കടല | ಕಡಲೆ | கடலை |
| भर्त्सयन् | तर्जयन् | having scolded | ശകാരിച്ചിട്ട് | ನಿಂದಿಸುತ್ತಾ | திட்டினார் |
| पारयसि | शक्नोषि | you can | നിനക്ക് കഴിയും | ಶಕ್ತನಾಗಿರುವಿ | உன்னால் முடியும் |
| तूष्णीम् | मौनम् | silence | മൗനം | ಮೌನವಾಗಿ | மௌனம்/அமைதி |
| विहस्य | हासं कृत्वा | having smiled | ചിരിച്ചിട്ട് | ನಗಾಡುತ್ತಾ | சிரித்துக்கொண்டு |
| भृष्टम् | पक्वम् | fried | വറുത്തത് | ಹುರಿದ | வறுத்தது |
| चतुष्पथम् | चतुर्णां पथां संगमस्थानम् | cross road | നാല്ക്കവല | ನಾಲ್ಕು ದಾರಿಗಳು ಸೇರುವ ಜಾಗ | நாற்சந்தி |

| | | | | | |
|---|---|---|---|---|---|
| आतपक्लान्तः | आतपेन क्षीणः | tired due to sun heat | വെയിലേറ്റ് ക്ഷീണിച്ച | ಬಿಸಿಲಿನಿಂದ ಬಳಲಿದ | சூரியவெப்பத்தால் தளர்ந்து போனார் |
| अपरेद्युः | अन्यस्मिन्दिने | next day/other day | പിറ്റേന്ന് | ಮರುದಿನ | மறுநாள் |
| विक्रीय | विक्रयं कृत्वा | having sold | വിറ്റിട്ട് | ಮಾರಾಟಮಾಡಿ | விற்றுவிட்டு |
| प्रभूतम् | भूरि, अधिकं | plenty of | ധാരാളം | ಅಧಿಕ | ஏராளம் |
| इन्धनम् | काष्ठं | firewood | വിറക് | ಕಟ್ಟಿಗೆ / ಇಂಧನ | விறகு/எரிபொருள் |

## Lesson 2

| | | | | | |
|---|---|---|---|---|---|
| आयान्तु | आगच्छन्तु | come | വരൂ | ಬನ್ನಿ | வாருங்கள் |
| तिलानि वप्तव्यानि | तिलबीजानि आधेयानि | sesamum seed fit to be sown | എള്ള് വിതയ്ക്കണം | ಬಿತ್ತಲು ಯೋಗ್ಯವಾದ ಎಳ್ಳಿನ ಬೀಜಗಳನ್ನು | எள் விதைக்க வேண்டும் |
| परामर्शः | सूचना | reference | സൂചന | ಆಧಾರ/ಪ್ರತಿಪಾದನೆ | குறிப்பு |
| रोपणम् | अङ्कुरणम् | seedling | മുളപ്പിക്കൽ | ಬಿತ್ತನೆ | முளைக்கச் செய்தல் |
| सेकविधिः | सेचनविधिः | watering method | നനയ്ക്കുന്ന രീതി | ನೀರುಣಿಸುವಕ್ರಮ | நீர்ப்பாய்ச்சும் முறை |
| आलवालः | आवालम् (वृक्षाणां/सस्यानाम् अधः जलसेचनार्थं सज्जीकृतः भूभागः) | round trench | തടം | ಸಸ್ಯಗಳ ಕೆಳಗೆ ನೀರುಣಿಸಲು ವ್ಯವಸ್ಥೆಗೊಳಿಸಿದ ಭೂಭಾಗ | தடம் |
| उदकम् | जलम् | water | വെള്ളം | ನೀರು | நீர் |

| | | | | | |
|---|---|---|---|---|---|
| अनूपे | बहूदके | moor land | എപ്പോഴും വെള്ളമുള്ള സ്ഥലം | ಅಧಿಕ ನೀರು ಇರುವ | எப்போதும் நீர் இருக்கும் இடம் |
| रुग्णाः | रोगबाधिताः | afflicted by disease | രോഗബാധിതർ | ರೋಗಗಳಿಂದ ಬಾಧಿಸಲ್ಪಟ್ಟ | நோய்வாய்ப்பட்டவர் |
| विशोधनम् | शुचीकरणम् | cleansing | ശുചീകരണം | ಸ್ವಚ್ಛಗೊಳಿಸು | தூய்மையாக்குதல் |
| स्कन्धः | प्रकाण्डः | trunk of a tree | തായ്ത്തടി | ಮರದ ಕಾಂಡ | மரத்தின் உச்சி |
| संश्लेषितः | संलगितः | grafted | ഒട്ടിച്ചത് | ಕಸಿ ಕಟ್ಟು | ஒட்டவைத்தது |
| अनुमीयते | ऊह्यते | inferred | അനുമാനിക്കപ്പെട്ട | ಅನುಮಾನಿಸು | உய்த்துணர்தல் |
| अशोकः | वञ्जुलः | asoka tree | അശോകം | ಅಶೋಕ ಮರ | அசோகம் |
| अरिष्टः | निम्बः | nimba tree | ആര്യവേപ്പ് | ಕಹಿ ಬೇವಿನ ಮರ | ஆரிய வேப்பு |
| शिरीषः | भण्डिलः | sirisha tree | നെന്മേനിവാക | ಶೀಕಾಕಾಯಿ ಮರ | நென்மேனி வாகை |
| पनसः | कण्टकीवृक्षः | jack tree | പ്ലാവ് | ಹಲಸಿನ ಮರ | பலா |
| जम्बूः | जाम्बववृक्षः | rose apple tree | ഞാവൽ | ಜಂಬೂ ನೇರಳೆ ಮರ | நாவல் |
| वेतसः | वञ्जुलः | a kind of reed | ആറ്റുവഞ്ഞി | ಸುರುಳಿ ಹೂವಿನ ಗಿಡ | ஆற்றுவஞ்சி |
| कदम्बः | नीपः | cadamba tree | കടമ്പ് | ಕದಂಬ ಮರ | கடம்பு |
| द्राक्षा | मृद्वीका | vine | മുന്തിരി | ದ್ರಾಕ್ಷಾ ಬಳ್ಳಿ | திராட்சைக்கொடி |
| बीजपूरकः | मातुलुङ्गकः | citrus tree | കറി നാരകം | ಮಹಾಫಲ ಹುಳಿ ಮರ | நாரத்தம் |

# Lesson 4

| | | | | | |
|---|---|---|---|---|---|
| स्वास्थ्यम् | आरोग्यम् | health | ആരോഗ്യം | ಆರೋಗ್ಯವಂತ | உடல் நலம் |
| हिताहितम् | हितं च अहितं च | Agreeable and disagreeable | ഹിതവും അഹിതവും | ಯೋಗ್ಯವಾದ/ಅಯೋಗ್ಯವಾದ | ஒப்புக்கொண்டதும் ஒப்புக்கொள்ளாததும் |
| आयुः | जीवनकालः | life span | ആയുസ്സ് | ಆಯುಷ್ಯ | ஆயுள் |
| हेतुः | कारणम् | cause | കാരണം | ಕಾರಣ | காரணம் |
| लिङ्गं | ज्ञापकं | symptom | ലക്ഷണം | ರೋಗಲಕ್ಷಣ | அறிகுறி |
| चिकित्सा | व्याधिपरिहारः | treatment | ചികിത്സ | ಚಿಕಿತ್ಸೆ | சிகிச்சை |
| रोगग्रस्तः | रोगी | patient | രോഗി | ರೋಗಿ | நோயாளி |
| समग्रतया | साकल्येन | totally | സമ്പൂർണ്ണമായി | ಸಂಪೂರ್ಣವಾಗಿ | முழுவதுமாக |
| वैषम्यम् | विषमावस्था | imbalance | അസന്തുലിതം | ಅಸಮಾನತೆ | சமநிலையற்றது |
| साम्यम् | तुल्यता / समावस्था | equilibrium | സന്തുലിതം | ಸಮಾನತೆ | சமநிலை |
| कायचिकित्सा | शरीरसम्बन्धिनां सर्वेषां रोगाणां चिकित्साकार्याणि | general medicine | ശരീരചികിത്സ | ಶರೀರ ಸಂಬಂಧಿ ರೋಗಗಳಿಗೆ ಚಿಕಿತ್ಸೆ | பொதுமருத்துவம் |
| बालचिकित्सा | | paediatrics | ശിശുരോഗചികിത്സ | ಮಕ್ಕಳ ಚಿಕಿತ್ಸೆ | குழந்தை மருத்துவம் |
| ग्रहचिकित्सा | | psychiatry | മാനസികാരോഗ്യചികിത്സ | ಮಾನಸಿಕ ಚಿಕಿತ್ಸೆ | மனநோய் சிகிச்சை |
| ऊर्ध्वाङ्गचिकित्सा | (शालाक्यतन्त्रम्) | ENT | ചെവി, മൂക്ക്, തൊണ്ട ഇവയ്ക്കുള്ള ചികിത്സ | ಕಿವಿ, ಮೂಗು, ಗಂಟಲುಗಳ ಚಿಕಿತ್ಸೆ | காது, மூக்கு, தொண்டைக்கான சிகிச்சை |
| शल्यचिकित्सा | | surgery | ശസ്ത്രക്രിയ | ಶಸ್ತ್ರ ಚಿಕಿತ್ಸೆ | அறுவை சிகிச்சை |

| | | | | | |
|---|---|---|---|---|---|
| दंष्ट्राचिकित्सा | (अगदतन्त्रम्) | clinical toxicology | വിഷചികിത്സ | ವಿಷ ನಿವಾರಿಸುವ ಚಿಕಿತ್ಸೆ | விஷசிகிச்சை |
| जराचिकित्सा | (रसायनतन्त्रम्) | rejuvenative therapy | രസായനചികിത്സ | ನವ ತಾರುಣ್ಯವನ್ನುಂಟು ಮಾಡುವ ಚಿಕಿತ್ಸೆ | ரசாயனசிகிச்சை |
| वृषचिकित्सा | (वाजीकरणतन्त्रम्) | reproductive medicine | വാജീകരണചികിത്സ | ಪುನರುತ್ಪಾದನಾ ಶಕ್ತಿವರ್ಧಕ ಔಷಧಿ ಚಿಕಿತ್ಸೆ | இனப்பெரு சிகிச்சைக்க |

# Lesson 6

| | | | | | |
|---|---|---|---|---|---|
| वटवः | ब्रह्मचारिणः, छात्राः | pupils practising sacred knowledge (inmates of Asrama) | ആശ്രമവിദ്യാർത്ഥികൾ | ವಟುಗಳು | ஆசிரம மாணவர்கள் |
| भूतविशेषः | जन्तुविशेषः | strange creature | വിചിത്രജീവി | ವಿಶೇಷಜೀವಿ | வித்தியாசமான ஒரு ஜீவி |
| जनपदेषु | देशेषु | in the countrysides | ഗ്രാമങ്ങളിൽ | ದೇಶದಲ್ಲಿ/ಗ್ರಾಮದಲ್ಲಿ | கிராமங்களில் |
| सम्भ्रान्ताः | सम्भ्रमयुक्ताः | bewildered | പരിഭ്രമിച്ചവർ | ಭ್ರಾಂತಿಗೊಂಡ | தடுமாறியவர் |
| पशुसमाम्नाये | यागविधौ पशुपाठप्रकरणे | in the context of Pasupāta | യാഗവിധിയിലെ പശുപാഠപ്രകരണത്തിൽ | ಯಾಗ ವಿಧಿಯಪಶುಪಾಠನವಿದಿಯಲ್ಲಿ ಹೇಳಿದ | யாக - மிருகங்களைப் பற்றிச் சொல்லும் வேதபாகம் |
| सांग्रामिके | युद्धसम्बन्धिनि प्रकरणे-धनुर्वेदे | in archery | ധനുർവേദത്തിൽ | ಯುದ್ಧಕ್ಕೆ ಸಂಬಂಧಿಸಿದ ಪ್ರಕರಣದಲ್ಲಿ | தனுர்வேதத்தில் |
| धूनोति | चालयति | shaking | ഇളക്കുന്നു | ಅಲ್ಲಾಡಿಸು | ஆட்டுகின்றார் |
| शष्पाणि | बालतृणानि | young grasses | ഇളംപുല്ലുകൾ | ಎಳೆ ಹುಲ್ಲುಗಳನ್ನು | இளம்புல் |
| ग्रीवा | कन्धरः | neck | കഴുത്ത് | ಕುತ್ತಿಗೆ | கழுத்து |

| | | | | | |
|---|---|---|---|---|---|
| प्रकिरति | विक्षिपति | discharges (puts down) | ഇടുന്നു | ವಿಸರ್ಜಿಸುತ್ತದೆ | இடுதல் |
| प्राचेतसम् | वाल्मीकिम् | Valmiki | വാല്മീകിയെ | ವಾಲ್ಮೀಕಿಯನ್ನು | வால்மீகியை |
| आलापैः | भाषणैः | by conversations | സംഭാഷണങ്ങളാൽ | ಭಾಷಣಗಳಿಂದ | உரையாடல்களால் |
| सस्पृहम् | साभिलाषम् | with desire | അഭിലാഷത്തോടെ | ಅಭಿಲಾಷೆಯಿಂದ | விருப்பத்துடன் |
| निषङ्गिणः | तूणीरयुक्ताः | with quiver | ആവനാഴിയോടുകൂടിയവർ | ಬಾಣ/ಬತ್ತಳಿಕೆಗಳಿಂದ ಕೂಡಿದ | அம்பறாத்தூணியுடன் |
| आयुधीयाः | सैनिकाः | soldiers | ആയുധമേന്തിയവർ | ಆಯುಧಗಳನ್ನು ಧರಿಸಿದ (ಸೈನಿಕರು) | படைவீரர் |
| निकषः | शाणः | touch stone | ഉരകല്ല് | ಸಾಣೆಕಲ್ಲು | உரைகல் |
| विप्रत्ययः | संशयः | doubt | സംശയം | ಸಂಶಯವಿದ್ದರೆ | சந்தேகம்/ஐயம் |
| संदीपनानि | उद्दीपकानि | inspiring | പ്രേരിപ്പിക്കുന്നവ | ಉತ್ತೇಜಿಸುವ | தூண்டுபவை |
| प्राज्ञः | ज्ञानी | scholar | പണ്ഡിതൻ | ಜ್ಞಾನಿ/ಪಂಡಿತ | அறிவாளி |
| जाल्मः | अविवेकी/असमीक्ष्यकारी | stupid | മൂഢൻ | ಅವಿವೇಕಿ/ಯೋಚಿಸದೆ ಕಾರ್ಯಮಾಡುವವ | முட்டாள் |
| अजिनम् | मृगचर्म | skin of deer | മാൻതോൽ | ಮೃಗ ಚರ್ಮ | மான்தோல் |
| अतिजवेन | अतिवेगेन | speedly | അതിവേഗത്തിൽ | ಅತ್ಯಂತ ವೇಗದಿಂದ | மிகவேகத்தில் |

# Lesson 7

| | | | | | |
|---|---|---|---|---|---|
| दर्पणायन्ते | दर्पणा इवाचरन्ति | function as a mirror | കണ്ണാടിപോലെ | ಕನ್ನಡಿಯಂತೆ ವರ್ತಿಸುತ್ತದೆ | கண்ணாடிபோன்று |
| प्रमत्ताधिकारिवर्गः | उन्मत्तशासकवर्गः | arrogant ruling class | ഉന്മത്തരായ അധികാരി വർഗം | ಮದದಿಂದಕೂಡಿದ ಆಡಳಿತೆನಡೆಸುವ ಅಧಿಕಾರಿಗಳನ್ನು | உன்மத்தரான அதிகாரிகள் |
| सोपहासम् | सपरिहासम् | in jest | പരിഹാസത്തോടെ | ಅಪಹಾಸ್ಯದ ಮೂಲಕ | கேலியுடன் |

| | | | | | |
|---|---|---|---|---|---|
| शिरस्त्रम् | शिरोऽलङ्कारभूतः | head scarf | തലപ്പാവ് | ಪೇಟ/ಮುಂಡಾಸು | தலைப்பாகை |
| पट्टाम्बरम् | कौशेयवस्त्रम् | silken | പട്ടുവസ്ത്രം | ರೇಷ್ಮೆಬಟ್ಟೆ | பட்டாடை |
| द्रविडदेशः | दक्षिणभारतम् | Southern part of Vindhya | ദക്ഷിണഭാരതം | ದಕ್ಷಿಣ ಭಾರತ | தென் இந்தியா |
| कालक्षेपः | कालयापनम् | timepass | കാലംകഴിച്ചുകൂട്ടൽ | ಕಾಲಕಳೆ | பொழுது போக்கு |
| अपरेद्युः | अन्यस्मिन् दिवसे | other day | പിറ്റേദിവസം | ಮರುದಿನ | அடுத்த நாள்/மறுநாள் |
| द्रुतचलनम् | चटुलचलनम् | fast movement | ചടുലചലനം | ವೇಗದಿಂದ ಚಲಿಸು | வேகமான அசைவு |
| ऊर्ज्वस्वलता | ओजस्विता | vigorousness | ഊർജ്ജസ്വലത | ತೇಜಸ್ವಿನಿಂದ | ஊக்கம்/வலிமை |
| धैषणिकसंवादः | बौद्धिकविवादः | intellectual dialogue | പണ്ഡിതസംവാദം | ಬೌದ್ಧಿಕ ಚರ್ಚೆ | பண்டித விவாதம் |
| खलूरिका | आयोधनाभ्यासशाला | school of martial arts | കളരി | ಆಯೋಧನಾ ಪರಿಶೀಲನಾ ಶಾಲೆ | களரி |
| प्रणेता | उपज्ञाता | proponent | സ്ഥാപകൻ | ಪ್ರತಿಪಾದಕ/ರಚನಾಕಾರ | நிறுவனர் |

## Lesson 8

| | | | | | |
|---|---|---|---|---|---|
| अकल्याणम् | अमङ्गलम् | inauspicious | അശുഭം | ಅಮಂಗಳಕರವಾದ | அமங்கலம் |
| अटन्तः | सञ्चरन्तः | wandering | അലയുന്നവർ | ಅಲೆದಾಡುತ್ತಾ | சுற்றித்திரிகின்றவர் |
| आतिष्ठत | प्रतिज्ञामकरोत् | pledged | പ്രതിജ്ഞചെയ്തു | ಪ್ರತಿಜ್ಞೆ ಮಾಡಿದನು | உறுதி எடுத்தார் |
| उन्मादः | मनोविक्षेपः | madness | ഉന്മത്താവസ്ഥ | ಹುಚ್ಚು | பித்துப்பிடித்த நிலை |
| कुम्भम् | घटम् | pot | കുടം | ಮಡಕೆ | குடம்/கலம் |
| कोटरः | वृक्षबिलम् | cavity in a tree | മരപ്പൊത്ത് | ಪೊಟರೆ | மரப்பொந்து |
| घृतम् | आज्यम् | ghee | നെയ്യ് | ತುಪ್ಪ | நெய் |
| चारुतया | मनोहारितया | charmingly | മനോഹരമായി | ಮನೋಹರವಾಗಿ | அழகாக |

| | | | | | |
|---|---|---|---|---|---|
| नातिबृहन्तम् | नातिमहान्तम् | not too large | വളരെ വലുതല്ലാത്ത | ಅತಿವಿಶಾಲವಲ್ಲದ | சிறிய |
| पास्यन्ति | पानं करिष्यन्ति | will drink | കുടിക്കും | ಕುಡಿಯುತ್ತಾರೋ | குடிப்பார் |
| मधु | क्षौद्रम्, मद्यम् | honey, sweet intoxicating liquor | തേൻ, മദ്യം | ಜೇನು/ಮದ್ಯ | தேன், மது |
| वपुषा | शरीरेण | by body | ശരീരംകൊണ്ട് | ದೇಹದಿಂದ | உடம்பினால் |
| वंशम् | वेणु | bamboo | മുള | ಬಿದಿರು | மூங்கில் |
| व्याधः | शबरः | hunter | വേടൻ | ಕಿರಾತ/ಬೇಡ | வேடர் |
| शक्रः | इन्द्रः | Indra | ഇന്ദ്രൻ | ಇಂದ್ರ | இந்திரன் |

## Lesson 9

| | | | | | |
|---|---|---|---|---|---|
| आतपः | द्योतः | sun heat | വെയിൽ | ಬಿಸಿಲು | வெயில் |
| समीकरणम् | समतुलनम् | levelling | നിരപ്പാക്കൽ | ಸಮತಲಗೊಳಿಸು | ஒழுங்குபடுத்தல் |
| सारदारुः | दृढदारुः | strong wood | ഉൾക്കാമ്പുള്ള മരത്തടി | ಗಟ್ಟಿಯಾದ ಕಟ್ಟಿಗೆ | உறுதியான மரம் |
| जठरः | कुक्षिः | stomach | വയറ് | ಉದರ | வயிறு |
| हर्म्यम् | सौधम् | castle | കൊട്ടാരം | ಸೌಧ/ಅರಮನೆ | அரண்மனை |
| आशा | दिक् | direction | ദിക്ക് | ದಿಕ್ಕು | திசை |
| करार्धायतः | करार्धदीर्घयुतं | half hand long (a measurement) | അരക്കൈനീളം | ಅರ್ಧ ಕೈಯಷ್ಟು ಉದ್ದ | அரைக்கை நீளம் |
| कुटीरः | कुटीरकः | hut | കുടിൽ | ಗುಡಿಸಲು | குடிசை |
| कूपः | अन्धुः | well | കിണർ | ಬಾವಿ | கிணறு |
| वातायनम् | गवाक्षः | window | ജനൽ | ಕಿಟಕಿ | ஜன்னல் |
| गुहा | गह्वरः | cave | ഗുഹ | ಗುಹೆ | குகை |

| | | | | | |
|---|---|---|---|---|---|
| निर्धारणीयाः | निर्णेयाः | to be decided | നിർണയിക്കേണ്ടതാണ് | ನಿರ್ಧರಿಸಲ್ಪಡಬೇಕು | தீர்மானிக்கவேண்டும் |
| नीडं | कुलायः | nest | പക്ഷിക്കൂട് | ಗೂಡು | பறவைக்கூடு |
| पूर्वाह्णः | मध्याह्नात्पूर्वभागः | forenoon | രാവിലെ | ಬೆಳಗ್ಗಿನ ಸಮಯ | முற்பகல் |
| प्राह्णः | पूर्वाह्णात् पूर्वभागः (प्रातः कालः) | early morning | അതിരാവിലെ | ಪ್ರಾತಃ ಕಾಲ | விடியற்காலையில் |
| बिलं | विवरं | hole | ദ്വാരം | ಬಿಲ | துளை |
| वर्तुलः | वृत्तम् | cylindric | വൃത്താകാരമായ | ವೃತ್ತಾಕಾರ | வட்டவடிவமான |
| शङ्कुः | स्थाणुः | stump | കുറ്റി | ಶಂಕು/ಸ್ಥಂಭ | குற்றி/சிறுகோல் |
| प्रकोष्ठः | शयनगृहं | bedroom | കിടപ്പുമുറി | ಕೋಣೆ | படுக்கை அறை |
| सूत्रं | तन्तुः | thread | നൂൽ | ಧಾರ/ನೂಲು | நூல் |
| युगलम् | युग्मम् | double | ഇരട്ടി | ಜೋಡಿ/ಎರಡು ಪಟ್ಟು | இரட்டை |
| प्रासादः | देवमन्दिरम् | temple | ക്ഷേത്രം | ದೇವಸ್ಥಾನ | கோயில் |

# Lesson 10

| | | | | | |
|---|---|---|---|---|---|
| प्रसङ्गे | वेलायाम् | in the context of | സന്ദർഭത്തിൽ | ಸಂದರ್ಭದಲ್ಲಿ | சூழ்நிலையில் |
| सन्तप्तः | नितरां तप्तः | much depressed | അതീവ ദു:ഖിതൻ | ದುಃಖಿಗಳು | சோர்ந்து போனவன் |
| संसारः | प्रपञ्चः | world | ലോകം | ಪ್ರಪಂಚ | உலகம் |
| प्रज्ञैः | सुधीभिः | by scholars | പണ്ഡിതരാൽ | ಪ್ರಾಜ್ಞರಿಂದ/ಪಂಡಿತರಿಂದ | பண்டிதர்களால் |
| विभिन्नश्रेणीकाः | नानाविधाः | people of different levels | ഭിന്നതലത്തിലുള്ളവർ | ವಿವಿಧ ಸ್ತರದ ಜನರು | பல நிலைகளில் உள்ளவர்கள் |
| धृष्टतया | अहङ्कारेण | arrogantly | അഹങ്കാരത്തോടെ | ಅಹಂಕಾರದಿಂದ | செருக்குடன் |

| | | | | | |
|---|---|---|---|---|---|
| विभिन्नबुद्धिगतयः | नानाज्ञानस्तरीयाः | peopleof different opinions | വ്യത്യസ്തബുദ്ധി നിലവാരമുള്ളവർ | ವಿವಿಧ ಸ್ತರದ ಜ್ಞಾನವನ್ನು ಪಡೆದ ಜನರು | கருத்து வேறுபாடு உடையோர் |
| अप्राक्षीत् | अपृच्छत् | asked | ചോദിച്ചു | ಕೇಳಿದರು | கேட்டார் |
| वित्तपदादिसंपादन-विषयकाः | धनस्थानादि-संपादनोद्देश्यकाः | means to attain-wealth position etc. | ധനസ്ഥാനമാനാദികൾ നേടാൻ ആഗ്രഹിക്കുന്ന | ಸಂಪತ್ತು ಮತ್ತು ಅಧಿಕಾರ ಪಡೆಯುವ ವಿಷಯಗಳ | பணம், பதவி முதலியதுகுறித்தவை |
| आत्यन्तिकी | निस्सीमा | limitless (ultimate) | അളവറ്റ | ಅಂತಿಮ/ಅಂತ್ಯವಿಲ್ಲದ | அளவற்ற |
| उपकृतिः | उपकारः | help | സഹായം | ಉಪಕಾರ | உதவி |
| अधस्तनदेशेषु | निम्नदेशेषु | in lower strata | താഴ്ന്നപ്രദേശങ്ങളിൽ | ಕೆಳವರ್ಗದ ಜನರಿರುವ | தாழ்ந்த பகுதிகளில் |
| सुरनदी | गंगानदी | river Ganges | ഗംഗാനദി | ಗಂಗಾನದಿ | கங்கையாறு |
| ह्रदः | अगाधजलाशयः | deep water stock | കയം | ಆಳವಾದ ಜಲಾಶಯ | கயம்/ஆழமான பகுதி |
| पर्वतमस्तके | पर्वतशृङ्गे | on the peak | മലമുകളിൽ | ಪರ್ವತದ ತುದಿಯಲ್ಲಿ | மலைமேல் |
| विविक्ते | एकान्ते (विजने) | in solitude | വിജനത്തിൽ | ಏಕಾಂತದಲ್ಲಿ | மனித வாழ்க்கை இல்லாத இடம் |
| अतिशोभनं | अतिमनोहरम् | most beautiful | അതിമനോഹരം | ಅತ್ಯಂತ ಸುಂದರವಾದ | மிக்க அழகான |
| विभूषणं | विशिष्टं भूषणं (अलङ्कारः) | special ornament | വിശിഷ്ടാഭരണം | ವಿಶೇಷ ಆಭರಣ | சிறப்பான அணிகலன் |
| अनर्घम् | अमूल्यम् | invaluable | വിലമതിയ്ക്കാൻ പറ്റാത്ത | ಅಂತ್ಯಂತ ಬೆಲೆಬಾಳುವ | விலைமதிக்க முடியாத |
| अनूच्य | अध्याप्य | having taught | പഠിപ്പിച്ചിട്ട് | ಕಲಿಸಿ | படிப்பித்த பின்னர் |
| आचार्यः | गुरुः | teacher, preceptor | ആചാര്യൻ | ಆಚಾರ್ಯ/ಗುರು | ஆசிரியர்/ஆச்சாரியர் |
| अन्तेवासी | शिष्यः | disciple | ശിഷ്യൻ | ಶಿಷ್ಯ | சீடன் / மாணவன் |

| | | | | | |
|---|---|---|---|---|---|
| सत्यम् | ऋतम् | truth | സത്യം | ಸತ್ಯ | உண்மை |
| स्वाध्यायात् | स्वकीयवेदाध्ययनात् | from the study of one's own Veda | സ്വവേദപഠനത്തിൽനിന്ന് | ಸ್ವ ವೇದಾಧ್ಯಯನದಿಂದ | சுயவேத படிப்பிலிருந்து |
| प्रमदितव्यम् | स्खलितव्यम् | to be transgressed | ഇളകണം | ನಿವೃತ್ತನಾಗಬಾರದು | எல்லை மீறவேண்டும் |
| कुशलम् | आत्मरक्षणोपायः | means of self welfare | ക്ഷേമം | ಆತ್ಮರಕ್ಷಣಾ ಮಾರ್ಗ (ಕ್ಷೇಮ) | நலம் |
| भूतिः | ऐश्वर्यम् | prosperity | ഐശ്വര്യം | ಸ್ವ ಅಭಿವೃದ್ಧಿ ಮಾರ್ಗ | ஐசுவரியம்/செல்வம் |
| मातृदेवः | मातृभक्तः | one who considers mother as Goddess | മാതൃഭക്തിയോടുകൂടിയവൻ | ತಾಯಿಯನ್ನು ದೇವತೆ ಎಂದು ಭಾವಿಸುವ | தாயைக் கடவுளாக நினைப்பவர் |
| अनवद्यानि | निर्दोषाणि | faultless | ദോഷരഹിതങ്ങളായ | ನಿಂದನೆಗೆ ಯೋಗ್ಯವಲ್ಲದ | குற்றமற்ற |
| सुचरितानि | शोभनकर्माणि | virtuous deeds | നല്ല കർമ്മങ്ങൾ | ಉತ್ತಮ ಕಾರ್ಯಗಳು | நற்செய்கைகள் |
| उपास्यानि | अनुष्ठेयानि | to be followed | അനുഷ്ഠിക്കേണ്ടതാണ് | ಆಚರಿಸಲ್ಪಡಬೇಕು | பின்பற்றவேண்டும் |
| श्रेयांसः | प्रशस्यतराः | more praiseworthy | കൂടുതൽ നല്ലവർ | ಅತಿ ಪ್ರಶಂಸೆಗೆ ಪಾತ್ರರಾದ | உயர்ந்தவர்கள் |
| ब्राह्मणाः | ब्रह्मज्ञानिनः | Vedic scholars | വേദം അറിയുന്നവർ | ಬ್ರಹ್ಮಜ್ಞಾನಿಗಳು | வேத பண்டிதர்கள் |
| प्रश्वसितव्यम् | आश्वासः दातव्यः | should be consoled | ആശ്വസിപ്പിക്കണം | ಪೂಜಿಸಲ್ಪಡಬೇಕು | ஆறுதல் கூறவேண்டும் |
| श्रद्धया | सश्रद्धम् | with faith | വിശ്വാസത്തോടെ | ಶ್ರದ್ಧೆಯಿಂದ | நம்பிக்கையுடன் |
| श्रिया | सम्पदमनुसृत्य | with wealth | സമ്പത്തോടെ | ಸಂಪತ್ತಿಗನುಸಾರವಾಗಿ | செல்வத்துடன் |
| ह्रिया | लज्जया | with modesty | നമ്രതയോടെ | ವಿನಯದಿಂದ | பணிவுடன் |
| संविदा | यथार्थज्ञानेन | with real knowledge | യഥാർത്ഥജ്ഞാനത്തോടെ | ತಿಳುವಳಿಕೆಯಿಂದ | உண்மையான அறிவுடன் |

| | | | | | |
|---|---|---|---|---|---|
| कर्मविचिकित्सा | कर्मणि सन्देहः | doubts regarding duties | കർമ്മത്തിലുള്ള സംശയം | ಕರ್ಮದ ಕುರಿತು ಸಂಶಯ | கடமை தொடர்பான சந்தேகம் |
| सम्मर्शिनः | विवेकिनः, विचारशीलाः | well balanced in judgement | വിവേകികൾ | ವಿವೇಕಿಗಳು/ವಿಚಾರಶೀಲರು | நடுநிலையாளர் |
| आयुक्ताः | परप्रेरणारहिताः | who are not guided by others | മറ്റുള്ളവരാൽ പ്രേരിപ്പിക്കപ്പെടാത്തവർ | ಇತರರಿಂದ ಪ್ರೇರೇಪಿಸಲ್ಪಡದ | பிறரால் தூண்டப்படாதவன் |
| अलूक्षाः | अक्रूरस्वभावाः | not cruel | ക്രൂരസ്വഭാവമല്ലാത്ത | ಕ್ರೂರಿಗಳಲ್ಲದ | கொடிய குணம் இல்லாத |
| अभ्याख्यातः | दोषशङ्काबाधितः | suspected/accused | കുറ്റാരോപിതൻ | ದೋಷ ಮತ್ತು ಸಂಶಯಕ್ಕೊಳಗಾದ | குற்றம் சாட்டப்பட்டவர் |
| आदेशः | विधिः | command | ആജ്ഞ | ಆದೇಶವನ್ನು | கட்டளை/ஆணை |
| अनुशासनम् | ईश्वरवचनम् | commandment | ഈശ്വരാജ്ഞ | ಈಶ್ವರ ವಚನವೆಂದು | கடவுள் கட்டளை |
| उपासितव्यम् | उपास्यम् | to be worshipped | ആരാധിക്കപ്പെടേണ്ടത് | ಪೂಜಿಸಲ್ಪಡಬೇಕು | வணக்கத்திற்குரியவர் |